# पदार्थविषये

# न्यायकन्दलीकिरणावल्योस्तुलनात्मकमालोचनम्

# Padārthaviṣaye

# nyāyakandalīkiraṇāvalyostulanātmakamālocanam

यादवपुरविश्वविद्यालयस्थ-संस्कृतसंकाये सप्तदशाधिक-द्विसहस्रतमाङ्गल-
वर्षारम्भकोनविंशत्यधिक-द्विसहस्रतमाङ्गल-वर्षावधिक-शिक्षावर्षे
एम.फिल्-इत्युपाध्यधिगम-निमित्तक-गवेषणनिबन्धः


**शोधवन्धकर्ता** –
श्रीजीव-गोस्वामी
Roll No. – 001701203007
Examination Roll No. MPSA194007
Year – 2017 - 2019
Registration No. – 142338 of 2017 -18

**निर्देशकाः** –
अध्यापकाः तपनशङ्कर-भट्टाचार्याः
संस्कृत-विभागीयाः
यादवपुरविश्वविद्यालयस्य

# पदार्थविषये

# न्यायकन्दलीकिरणावल्योस्तुलनात्मकमालोचनम्

# Padārthaviṣaye

# nyāyakandalīkiraṇāvalyostulanātmakamālocanam

यादवपुरविश्वविद्यालयस्थ-संस्कृतसंकाये सप्तदशाधिक-द्विसहस्रतमाङ्गल-
वर्षारम्भकोनविंशत्यधिक-द्विसहस्रतमाङ्गल-वर्षावधिक-शिक्षावर्षे
एम.फिल्-इत्युपाध्यधिगम-निमित्तक-गवेषणनिबन्धः

**शोधवन्धकर्ता** –
श्रीजीव-गोस्वामी
Roll No. – 001701203007
Examination Roll No. MPSA194007
Year – 2017 - 2019
Registration No. – 142338 of 2017 -18

**निर्देशका:** –
अध्यापका: तपनशङ्कर-भट्टाचार्या:
संस्कृत-विभागीया:
यादवपुरविश्वविद्यालयस्य

CERTIFIED THAT THE THESIS ENTITLED **‘पदार्थविषये न्यायकन्दलीकिरणावल्योस्तुलनात्मकमालोचनम्’** submitted by me, Examination Roll. No. MPSA194007, Registration No. 142338 of 2017 -18 for the award of the degree of Master of Philosophy in Sanskrit at the Jadavpur University is based upon my own work carried out under the Supervision **Professor Dr. Tapan Sankar Bhattacharyya** and that neither this dissertation nor any part of it has been submitted before for any diploma anywhere/ elsewhere.

| | |
|---|---|
| …………………………. | ……………………. |
| Countersigned by | Candidate: |
| The Supervisor | Date: |
| Prof. Tapan Sankar Bhattacharyya | |
| Date: | |

## TO WHOM IT MAY CONCERN

This is to certify that **Srijib Goswami** has prepared this dissertation entitled **‘पदार्थविषये न्यायकन्दली-किरणावल्योस्तुलनात्मकमालोचनम्’**, I consider it fit for submission for the degree of Master of Philosophy (Arts) in the department of Sanskrit of Jadavpur University.

the Head of the Department of Sanskrit
Jadvpur University
Kolkata – 700 032

# DECLARATION BY THE SUPERVISOR

This is the certify that the project work dissertation entitled **'पदार्थविषये न्यायकन्दलीकिरणावल्योस्तुलनात्मकमालोचनम्'** Submitted in partial fulfilment of the degree of **Master of Philosophy** (Arts) in Sanskrit Jadavpur University bona-fide record of the project work carried out by **Srijib Goswami** (Examination Roll. No. MPSA1940007, Registration No. 142338 of 2017 -18) under my guidance and supervision and I certify that this work is original and has not been submitted elsewhere for any degree.

………………………………..
Countersigned by the Supervisor
Prof. Tapan Sankar Bhattacharyya
Jadavpur University
Date:

# कृतज्ञतासमर्पणम्

श्रीमद्वृन्दावनचरणारविन्दे समञ्जुलगुञ्जनं सञ्चरति द्विरेफे इव जगतीह रजःकण-लव-कोटि-खण्ड-लवोपमेन जनेनानेन कृतः ‘पदार्थविषये न्यायकन्दलीकिरणावल्योस्तुलनात्मकमालोचनम्’ इति बन्धो नूनम् अणूनाम् अणुत्वहारी, तस्य च कर्ता अयमहमिति मतिरच्युतचेतसि हास्यरसं न कथं स्फुरयेत्? किन्तु ‘निमित्तमात्रं भव सव्यसाचिन्’ इत्यादिदैवतगिरां ज्ञानमेवेह मम कर्तृत्वेन प्रवृत्तौ हेतुरिति मन्वानस्य मे एतद्ग्रन्थरचने सहायतां विदधद्भ्यः कृतवेदित्ववेदनस्यायमवसरः। तत्र ह्यादौ पित्रोराशीःप्रसूनं कारणमौलिरूपं स्मरामि यद्विना न मे कर्मणि प्रवृत्त्यवसरः। प्रवृत्तस्य वा मे न कथञ्चिदपि प्रसरः कृपावर्षणपुरस्सरमाचार्याणाम् अध्यापक-तपन-शङ्कर-भट्टाचार्यमहाभागानां मार्गनिर्देशं विना इत्यतः साम्प्रतं तेभ्यो नामं नामं विज्ञाप्यते कार्तज्ञ्यम्। यादवपुरविश्वविद्यालयस्य अन्येभ्यः अपि आचार्येभ्य आचार्याभ्यश्च कार्तज्ञ्यं मदीयम्। पश्चिमवङ्ग-राज्य-विश्वविद्यालयस्य अध्यापकानाम् अयनभट्टाचार्य-महाभागानां सेख-साबिर-आलि-महोदयानाञ्च उपदिष्टवतां स्मरापि कृपाम्।

यादवपुरविश्वविद्यलयीय-ग्रन्थागाराद् ग्रन्थग्रहणाद् एव बन्धोऽयं पूर्णतां गत इत्यतस्तत्रस्थेभ्यो जनेभ्यः धन्यवादाः कार्तज्ञ्यञ्च। अद्वैताश्रमीय-स्वामिचरणेभ्यः ग्रन्थग्रहणावसरं प्रदत्तवद्भ्यो मे नतिर्निवेद्यते। ग्रन्थागारस्य अग्रजा अपि सततं सस्नेहं निर्बाधं विविधं पुस्तकं प्रदाय मां धन्यम् अकार्षुः। अपि च श्रीमत्तत्त्वविदानन्द-स्वामिचरणानां कृपावर्षास्नातमात्मानं मन्यमानस्तेभ्यः मानकीनान् प्रणामान् श्रद्धागर्भान् निवेदयामि।

मदग्रजेभ्यः सन्तोषगौराङ्ग-हाराधनारूपजगदीशाख्येभ्यः तथा अग्रजविशेषाय दीपकाय, अनुजाय देवेन्द्र-सुव्रत-देवाशिषाख्येभ्यः, अनुजायै ममतायै च ज्ञाप्यते कार्तज्ञ्यम्। एतदतिरिक्ता अपि ये प्रत्यक्षाप्रत्यक्षसाहायककारिणस्तेषां सविधे अप्यहमात्मानं मन्ये कृतवेदिनम्।

# शब्दसंकेतः

क.उ. – कठोपनिषद्

कि.व. – किरणावली

कि.व.प्र. – किरणावलीप्रकाशः

त.स.दी. – तर्कसङ्ग्रहतीपिका

न्या.क. – न्यायकन्दली

न्या.कु. – न्यायकुसुमाञ्जलिः

प्र.पा.भा. – प्रशस्तपादभाष्यम्

ब.न.च.– बङ्गे नव्यन्याय चर्चा

बृ.आ. – बृहदारण्यकोपनिषद्

भा.प. – भाषापरिच्छेदः

वै.सू. – वैशेषिकसूत्रम्

# सूचीपत्रम्


| विषयः | पत्राङ्कः |
| --- | --- |
| उपोद्घातः | १-५ |
| प्रथमोऽध्यायः | |
| वैशेषिकदर्शनस्य परिचयः | ६-१७ |
| द्वितीयोऽध्यायः | |
| न्यायकन्दली-किरणावलीकार-परिचयः | १८-२३ |
| तृतीयोऽध्यायः | |
| वैशेषिकदर्शने पदार्थतत्त्वम् | २४-२७ |
| चतुर्थोऽध्यायः | |
| पदार्थविषये न्यायकन्दलीकिरणावल्योस्तुलनात्मकमालोचनम् | २८-७१ |
| उपसंहारः | ७२-७६ |
| ग्रन्थसूचिः | ७७-८० |

# पदार्थविषये

# न्यायकन्दलीकिरणावल्योस्तुलनात्मकमालोचनम्

**उपोद्घातः -**

षडास्तिकदर्शनेषु सांख्यं वैशेषिकं च प्राचीनतममिति मन्यते। तत्र वैशेषिकदर्शनं वैशेषिकसूत्रालम्बि। वैशेषिकसूत्रप्रणेता च महर्षिः कणादः। वैशेषिकसूत्राणि अधिकृत्य प्रशस्तपादाचार्येण पदार्थधर्मसङ्ग्रहो नाम व्याख्यानं विहितम्, किन्तु तद् विस्तृतं नातिसुबोधं च। अतस्तद्ग्रन्थस्य सुखबोधाय उत्तरकाले व्योमशिवाचार्येण, श्रीधराचार्येण, उदयनाचार्येण अन्यैश्च बहुभिर्विदग्धैः भूयशः टीका रचिताः। टीकासु च दृश्यते मिथो वैमत्यं भूयसा। सति च वैमत्ये संशयः स्वाभाविकः। कथं तर्हि संशयस्य अपनयः? विप्रतिपन्ननयानां पर्यालोचनेन। किं मतं युक्तं किञ्च युक्ततरमिति विचारः तुलनात्मकपर्यालोचनम् अपेक्षते। पदार्थधर्मसङ्ग्रहस्य व्याख्याकारेषु श्रीधराचार्य उदयनाचार्यश्च नितरां प्रख्यातौ। उभयोरपि मतम् अतिसूक्ष्मं विशदञ्च। किन्तु तयोरपि दृश्यते मतवैभिन्न्यम्।

यथा श्रीधरभट्टेन ‘तमो नाम रूप-संख्या-परिमाण-पृथक्त्व-परत्वापरत्व-संयोग-विभागपरत्वापरत्ववेगवद् द्रव्यान्तरमस्तीति चेत्?’ इत्यादिना तमसो

सप्तपदार्थेषु द्रव्ये अन्तर्भावं निराकृत्य, 'तर्हि भासाम् अभाव एवायम्?' इत्यादिना अभावस्वरूपतां खण्डयित्वा तमो रूपविशेष इति तस्य गुणे अन्तर्भावं संसाधितवान्।

उदयनाचार्येण किन्तु इह तमसः क्रमेण गुणकर्मसामान्यविशेषसमवायेषु अनन्तर्भावं संसाध्य ततो नवद्रव्येषु अपि अनन्तर्गमनं प्रदर्श्य रूपितया क्रियावत्तया च तद् दशमं द्रव्यम् इति पूर्वपक्षमतम् उपस्थापितम्। ततस्तु तमोऽभावस्वरूपम् इति स्वमतं प्रतिष्ठापितम्।

गुणाश्चतुर्विंशतिरिति कथं संख्याव्यवहारो गुणानां निर्गुणत्वादिति शङ्कां निराकुर्वता श्रीधराचार्येण 'निर्गुणेष्वपि गुणेष्वसाधारण-धर्मयोगित्वेनोपचाराच्चतुर्विंशतिरिति व्यवहारः' इति व्याख्यातम्[१]। किरणावल्यां किन्तु 'एवं कण्ठोक्त्या समुच्चयेन चैकतया चतुर्विंशतिगुणा व्यवहर्तव्याः। तथाविधबुद्धिविषयतया सारूप्येण न तु संख्यायोगेन।[२]' इति व्याख्यातम्।

सत्ता कथं विशेषो न इति व्याख्यानं कृतं न्यायकन्दल्यां यत्, सत्ता यद्यपि द्रव्यत्वादिसामान्येभ्यः स्वयं व्यावर्त्तते तथापि सा स्वाश्रयं न सामान्यसमवायादिभ्यो न व्यावर्तयितुं शक्नोति, सामान्यसमवायादीनाम् अपि सद्बुद्धिवेद्यत्वात्, अतो न सत्ता विशेषः। किन्तु सत्ता कथं व्यावर्तयितुं न

[१] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-४०

[२] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-११८

शक्नोति, द्रव्यत्वादिसामान्यं च कथं स्वाश्रयं विजातीयेभ्यो व्यावर्तयति अपि इति न व्याख्यातम्। किरणावल्यां किन्तु तद्विषये कृतं व्याख्यानम्, व्यक्तिमात्रव्यङ्ग्यत्वात् व्यञ्जकनियमाभावाच्च न सत्ताया व्यावर्तकत्वम्, अतो न सा विशेषः। द्रव्यादिसामान्यं तु संस्थानगुणकार्यकारणादिव्यङ्ग्यत्वात् तेषामनियतत्वेन च सर्वत्राभिव्यक्त्यभावाद् व्यावर्तकमपि भवति[३]।

ननु द्रव्यत्वादिसामान्यं यदि युगपत् सामान्यं विशेषश्च तर्हि कथं तस्य केवलं सामान्ये एव अन्तर्भावो न विशेषे इति शङ्कोत्तरत्वेन न्यायकन्दलीकारमतम् इदं युक्ततरं भाति, 'द्रव्यत्वादिषु सामान्यशब्दो मुख्यः, अनुवृत्तिहेतुत्वस्य सामान्यलक्षणस्य सम्भवात्, विशेषशब्दश्च भाक्तः, स्वाश्रयो विशिष्यते सर्वतः अत्यन्तं व्यवच्छिद्यते येन स विशेष इति लक्षणस्यात्राभावात्। इदन्तु लक्षणमत्यन्त्यविशेषेष्वस्ति।[४] किरणावलीकारमते अनुवृत्ति-हेतुत्वरूपैक-मात्र-निमित्त-वशात् व्यावृत्ति-हेतु-रूपैक-मात्रनिमित्तवशाच्च सत्तायाम् अन्त्येषु च एकैका संज्ञा, द्रव्यत्वादिसामान्येषु तु निमित्तद्वयसमावेशात् संज्ञाद्वयभाजनं भवति[५]।

[३] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१२५
[४] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-४६
[५] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- १२९

न्यायकन्दल्यां पुनः श्रीधराचार्येण व्याख्यातम् आकाशस्य आकाशपदस्य च वाच्यवाचकभावसम्बन्धस्य समवायत्वापत्तिवारणाय इहप्रत्ययहेतुः इति भाष्यस्थं पदम्। वाच्यवाचकभावे तु तस्मात् शब्दात् तदर्थो ज्ञायते इति प्रतीतिः भवति न खलु इह इदम् इति प्रतीतिः। आधार्याधारभावे सति किन्तु इह इदम् इति भवति प्रतीतिः।

किन्तु किरणावलीकारमते तु तादृशसम्बन्धस्य वारणं भाष्यस्य आधार्याधारभूतानामिति पदेनैव सिद्धं भवति, तादृशसम्बन्धेनाधार्याधारभावस्य असिद्धेः। तन्मते हि इहप्रत्ययहेतुः इति पदं स्वभावादाधार्याधारणं भवति न तु आगन्तुकेन धर्मेण इत्यस्य प्रमाणम्। इह तन्तुषु पट इह दुग्धे धवलत्वम् इहि गवि गोत्वम् इत्यादिप्रतीतयः सम्बन्धम् अन्तरेण नोपपद्यन्ते, अतस्तस्य सम्बन्धविशेषस्य व्यवस्था।

वस्तुतस्तु आधार्याधारभूतानामिति पदेनैव कार्यकारणलक्षणसम्बन्धस्य वाच्यवाचकसम्बन्धस्य च इति उभयोरपि वारणसिद्धेः वाच्यवाचकसम्बन्धस्य व्यवच्छेदाय इहप्रत्ययहेतुः इति पदम् इति कथने सिद्धसाधनदोषो भवति, किन्तु इहप्रत्ययहेतुः इति युक्तेः प्रमाणम् इति कथने न तादृशो दोषो भवतीति उदयनाचार्यमतमिह वरं भवति।

सत्याम् ईदृश-विप्रतिपन्नमत्यां कठिनम् एकतरपक्षग्रहणम् इत्यतः अत्र श्रीधराचार्योदयनाचार्यकृतयोः न्यायकन्दलीकिरणावल्योः पदार्थतत्त्वविषये व्याख्यायाः तुलनात्मकमालोचनं विधीयते।

# प्रथमः अध्यायः

## वैशेषिकदर्शनस्य परिचयः

वैशेषिकदर्शनस्य प्राचीनत्वं कियदिति प्रत्येतुं शक्यं श्रुत्यां तद्बीजदर्शनात्। बृहदारण्यकोपनिषदि आम्नातम् – 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्[६]' इतीह कर्तव्यत्वेन निरूपितं यद् आत्ममननं तद्धि सविचारमात्मानुसन्धानम्। किञ्च सविचारमात्मानुसन्धानम्? श्रुतिप्रतिपादितस्यैव आत्मतत्त्वस्य युक्त्या विचारः। कठोपनिषदि च आम्नातम् – 'नैषा तर्केण मतिरापनेया'[७] इत्यत्र ऋषिणा श्रुतिविरोधी तर्क एव निरूपितः, यः केवलतर्कः तेन न परतत्त्वमधिगन्तुं शक्यते, अतः कठोपनिषद्यपि दृश्यते तर्कोल्लेखः। प्रसिद्धश्च अजातशत्रोः राजर्षेर्जनकस्य सभायां च शास्त्रार्थविचारः। एतेन सुगममिदं यत् तत्कालीना विद्वांसोऽपि तर्करीतिवेदिन आसन्।

---

[६] बृ.आ. – ४.५.६

[७] क.उ. – २.९

वैशेषिकदर्शने द्रव्यगुणकर्मसामान्यसमवाया इति षट्पदार्था वर्णिताः (अभावो न सूत्रितः)। तत्र विहितपदार्थ-साधर्म्य-वैधर्म्य-विचार-जन्य-लक्षण-परीक्षा-जन्य-पदार्थ-तत्त्व-ज्ञान-जन्यो भवति आत्म-विवेकः अनायासः। वैशेषिक-दर्शन-निरूपितात्मानात्मविवेकज्ञानं विचारसाध्यम्, तद्दर्शनीयो विचारश्च मननमेव। अत इदं वैशेषिकदर्शनं मननोपयोगि।

श्रुतिवाक्यात् श्रुतस्य आत्मतत्त्वस्य मननान्निदिध्यासनाच्च परं योगसाहायकेन भवत्यात्मसाक्षात्कारः। तादृशसाक्षात्कारात्मकज्ञानादेव निवर्त्तते आत्मविषयकमज्ञानम्, ततो दोषास्ततश्चाखिलदुःखमत्यन्ततया निवर्त्तते। एतच्च प्रायेण न्यायमतसम्मतम् अपि। तदुक्तं सूत्रम् – ‘दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः[८]’ इति।

यदत्राहुः केचित् –

धर्मं व्याख्यातुकामस्य षट्पदार्थोपवर्णनम्।

सागरं गन्तुकामस्य हिमवद्वर्णनं यथा।। इति वैशेषिकतत्त्वावबोधाभावादसद्वचनमिदम्, वैशेषिकशास्त्रप्रतिपादित-साधर्म्य-वैधर्म्य-विचार-रूपमननस्य निवृत्त्यात्मक-धर्मत्वात्, तद्धर्म-सहकृत-

[८] न्या.द. – १.१.२

निदिध्यासन-सहित-योग-रूप-निवृत्ति-धर्म-विशेषाद् आत्म-साक्षात्काराद् दुःखनिवृत्तिसिद्धेः।

वैशेषिकदर्शने षट् पदार्थाः कण्ठत उक्ताः, सप्तमश्च पदार्थः अभावस्तात्पर्यतो बोध्यः। वैशेषिकशास्त्रप्रतिपादितसप्तपदार्थान् दर्शनान्तराणि मुख्यत्वेन च न्यायशास्त्रमतितरामालम्बते। यद्यपि न्यायशास्त्रं प्रमाणशास्त्रं तथापि तथापि प्रमेयविषये सत्सु अपि षोडशपदार्थेषु वैशेषिकशास्त्रोक्तसप्तपदार्थानेव आश्रयन्ति। न्यायशास्त्रोक्ता षोडशपदार्था नव्यन्याये वैशेषिकप्रतिपादितसप्तपदार्थान्तर्गता इति साधितम्।

ननु किं तावदिदं वैशेषिकदर्शनमित्येवादौ निरूप्यम्। अत्रोच्यते विशेषेण सम्बद्धम् इत्यर्थे 'संसृष्टेः[९]' इति सूत्रेण विशेषशब्दात् ठक्प्रत्यये 'ठस्येकः[१०]' इति सूत्रेण ठकारस्येकादेशे 'तद्धितेष्वचामादेः[११]' इति सूत्रेण आदिस्वरवृद्धौ वैशेषिकशब्दो निष्पन्नः। तेन विशेषसम्बद्धदर्शनं वैशेषिकदर्शनमित्यर्थः। सम्बन्धश्चात्र दर्शनेन सह विशेषस्य वाच्यवाचकभावः।

ननु कोऽयं विशेषः? विशेषस्तु पदार्थविशेषः नित्यद्रव्यवृत्तिः अन्त्यो व्यावर्तकश्च, अयञ्च नान्यप्रस्थानप्रतिपादितः। अतो यच्छास्त्रम् एतद्विशेषपदार्थप्रतिपादकं तद्वैशेषिकम्। विशेषशब्देन आत्मविशेषगुणा वा

[९] अष्टाध्याय्याम् – ४.४.२२

[१०] तत्रैव – ७.५.५०

[११] तत्रैव – ७.२.११७

बोध्याः, ज्ञान-सुख-दुःखेच्छा-द्वेष-यत्न-धर्माधर्म-भावनाख्यसंस्कारा ह्यात्मविशेषगुणाः। अखिलात्मविशेषगुणोच्छेदो हि मुक्तिः, तेन तद्विशेषगुणसम्बद्धं हि दर्शनं वैशेषिकदर्शनम्। विशेषणम् एव वा विशेषः, स च लक्षणपरीक्षाभ्यां पदार्थप्रतिपादनम्, तद्यत्र शास्त्रे तद्वैशेषिकम्। एतदखिल-व्युत्पत्तिश्च कालीपदतर्काचार्य-कृत-प्रशस्तपाद-भाष्य-सूक्तिदीपिकोपद्घाततो गृहीता।

वैशेषिकदर्शनस्य मूले तथा तद्भाष्यटीकादिषु क्वापि अलौकिकप्रत्यक्षस्य वर्णनं नोपलभ्यते। प्रशस्तपादभाष्ये यद्यपि योगिप्रत्यक्षस्य उल्लेखो दृश्यते तेन च योगजसन्निकर्षस्य स्वीकारे अपि सामान्यलक्षणसन्निकर्षविषये तथा ज्ञानलक्षणसन्निकर्षविषये न किमपि उल्लिखितम्। वस्तुतो न्यायदर्शने अपि एतद्विषये न किमपि प्राप्यते। एतत् तत्त्वं हि गङ्गेशोपाध्यायेन एव आविष्कृतम्। न्यायदर्शनस्य तात्पर्यटीकायां योगप्रभावो वर्णितः, तेन कथञ्चिद् योगजसन्निकर्षो ग्रहीतुं शक्यते, किन्तु सामान्यलक्षण-ज्ञानलक्षण-सन्निकर्ष-विषये न किमपि दृश्यते। अतो वक्तुं शक्यते अलौकिकसन्निकर्षत्रयं नव्यन्यायतत्त्वम्। तत्र पुनः रघुनाथशिरोमणिना सामान्यलक्षणसन्निकर्षः खण्डितः।

लौकिकप्रत्यक्षं संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्च इति षट् सन्निकर्षा

न्यायवार्त्तिके उक्ताः। यद्यपि एते वैशेषिकैः अपि अभ्युपगताः तथापि सूत्रभाष्यादिषु क्वापि स्पष्टोल्लेखो न दृश्यते।

अनुमानप्रामाण्यं वैशेषिकैः नैयायिकैश्च उभयैः एव स्वीकृतम्। न्यायदर्शने पूर्ववत्, शेषवत्, सामान्यतोदृष्टञ्च इति त्रिविधम् अनुमानम् अङ्गीकृतम्, वैशेषिकदर्शने च दृष्टं सामान्यतोदृष्टञ्च इति द्विविधम्।

न्यायदर्शने अनैकान्तिकः, विरुद्ध, प्रकरणसमः (सत्प्रतिपक्षः), साध्यसमः (असिद्धः), कालातीतः (बाधितः) इति पञ्च हेत्वाभासा अङ्गीकृताः। वैशेषिकनये तु असिद्धः, विरुद्धः, सन्दिग्धश्च इति त्रिविधो हेत्वाभासः।

इदानीम् अवयवविषये आलोच्यते। न्यायदर्शने परार्थानुमाने प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनम् इति पञ्च अवयवा अङ्गीकृताः। वैशेषिकदर्शने अपि ते एव अवयवा अङ्गीकृताः किन्तु नामान्तरेण, यथा प्रतिज्ञा, अपदेशः, निदर्शनम्, अनुसन्धानम्, प्रत्याम्नायश्च इति।

नैयायिका वैशेषिकाश्च उभये एव असत्कार्यवादिनः। नैयायिकाः पिठरपाकवादिनः, पिठरशब्दस्य अर्थः अवयवी, अवयविनां सच्छिद्रत्वाद् युगपद् एव अवयविनि तथा अवयवेषु च पाको भवति। वैशेषिकास्तु पीलुपाकवादिनः, पीलुशब्दस्य अर्थः परमाणुः, एतेषां नये परमाणुषु एव

पाको भवति, अवयविनां निश्छिद्रत्वात् तत्र पाको न सम्भवेद् इति वैशेषिकसमयः। प्रामाण्यस्य उत्पत्ति-ज्ञप्तिपक्षयोः उभौ एव परतस्त्ववादिनौ।

एवं सत्यपि दर्शनयोरुभयोर्वैमत्ये आत्यन्तिक-दुःख-ध्वंस-रूप-परम-पुरुषार्थ-विषये उभौ समानमनस्कौ[१२]।

**वैशेषिकसूत्रकारपरिचयः**

वैशेषिकसूत्राणां प्रणेता कणादः। कणभुक्, कणभक्षः, योगी, उलूकः, काश्यप इति तस्य नामान्तराणि। इयमस्ति प्रसिद्धिः यत् कदाचित् सृष्ट्यन्ते कश्चन तीर्थक आविर्बभूव। आदिनमरण्यस्थस्तपश्चारी गभीररात्रौ भोज्यान्वेषी बहिरटति स्म, अतः उलूकवृत्तिः स उलूकाख्योऽभवत्। अत्युग्रतपश्चरेण क्षीणकायत्वात् तद्दर्शनात् तरुण्यो भयमुपसेदुः। ततः परिपूर्णनिशि मृगयता प्राप्तैर्धान्यकणैरात्मक्षुदुपशमात् स कणादकणभक्षसंज्ञः अपि बभूव। अत्र विषये आचार्यगुणरत्नेन तदीयतर्करहस्यदीपिकायामुक्तं – 'मुनिविशेषस्य कापोतीं वृत्तिमनुष्ठितवतो रथ्यानिपतितांस्तण्डुलकणानादायादाय कृताहारस्याहारनिमित्तात् कणाद इति संज्ञाजनि।' इति।

केचिद् ईदृशीं प्रसिद्धिं न सहन्ते, ते आहुः - कणादेन शास्त्रे परुमाणोर्विशेषेणालोचितत्वात् तत्प्रतिपक्षिणस्तं कणाद इति नाम्ना उपहसन्ते

---

[१२] प्र.पा., सम्पा. ब्रह्मचारीमेधाचैतन्य, प्रथम भाग, पृष्ठा - छ (भूमिका)

स्म[१३]। इयञ्चापरा प्रसिद्धिः – महर्षेरुग्रतपस्तुष्ट ईश उलूकरूपस्तत्पुरत आविर्भूय षट्पदार्थानुपदिदेश। ‘उलूकः परमो विप्रो मार्कण्डेयो महामुनिः’ इत्युलूकनाम च महाभारतस्य शान्तिपर्वणः सप्तचत्वारिंशे अध्याये एकादशे श्लोके प्राप्यते।

**वैशेषिकसूत्राणां कालविचारः**

न्यायसूत्राणां तथा वैशेषिकसूत्राणामुभयेषामेव कस्तावद्रचनाकाल इति निर्णयोऽद्यावधि दुश्शकः। ड.सुरेन्द्रनाथ-दासगुप्त-महोदयस्य मतम् एतद् यद् वैशेषिकसूत्रं न केवलं चरकसंहितायाः पूर्ववर्ति अपि तु वैशेषिकसूत्रस्य पदार्थविद्याश्रिता अपि चरकसंहिता। उक्तं तेन – ‘These considerations as well as the general style of the work and the methods of discussion lead me to think that these sutras are probably the oldest that we have and in all probability are pre-Buddhistic.[१४]’

वैशेषिकदर्शनेषु आत्मास्तित्वविषये न दृश्यते उल्लेखः। तत्र आत्मा अनुमेयः अहम्प्रत्ययगम्यो वा इति विषये सत्यपि विचारे आत्मनः असत्त्वोल्लेखः क्वापि न दृश्यते। अत एवमनुमातं शक्यते बौद्धदर्शनात्प्रागेव

---

[१३] कि.व., सम्पा. गौरीनाथ-शास्त्री, पृ. - २ (भूमिका)

[१४] A History of Indian Philosophy, p. 282

वैशेषिकदर्शनं नूनमरच्यत। ड.दासगुप्त-महोदयस्य मतानुसारं वैशेषिकसूत्रेषु ये सिद्धान्ता दृश्यन्ते तैर्नूनं किञ्चिद् अतिप्राचनीं मीमांसाप्रस्थानम् आश्रितैः भाव्यम्। आत्मपक्षं समर्थयता उक्तं तेन वैशेषिकसूत्रं धर्मप्रतिज्ञयारब्धम् अवसितं च वैदिक-कर्मानुष्ठान-जन्यादृष्ट-जन्याभ्युदयवर्णनेन। ड.राधाकृष्णन्-महोदयमते धर्मशब्द-प्रयोगदर्शनमात्रेण मीमांसाप्रस्थानबोधो न युक्तः। वैशेषिकसूत्रकृता प्रयुक्तो धर्मशब्दो निवर्त्तकधर्मपरकः, न तु प्रवर्त्तकधर्मपरकः अभीष्टः। गौरीनाथशास्त्रिणा तु धर्मशब्दस्तत्र पदार्थवाचक इति न्यरूपि। मीमांसाशास्त्रोक्तः चोदनालक्षणोर्थो धर्मो न वैशेषिकसूत्रकृतो लक्ष्यभूतः।

बौद्धदर्शनोत्तर-कालीनेष्वखिलास्तिक-दर्शन-शास्त्रेषु बौद्ध-मतानां प्रबल-खण्डन-दर्शनाद् वैशेषिक-सूत्रेषु च बौद्धमतखण्डककर्कशतर्कदर्शनाभावादनुमातुमिदं शक्यं बौद्धदर्शनपूर्वभावि वैशेषिकदर्शनम्। अपि च न्यायदर्शनादपि प्राग्भावीदं वैशेषिकदर्शनमित्यपि मन्यते, रैण्डेल-महोदयस्य मतेन वैशेषिकसूत्राणां पर्यवेक्षणेन स्थलविशेषेषु न्यायसूत्राणां रचनमभूत्[१५]।

वैशेषिकदर्शने बौद्धमतानां तथा वेदान्तमतानां विशेषेणोल्लेखाभावात् महाभारतादिग्रन्थे चोलूकर्षेर्नामदर्शनाद् वैशेषिकशास्त्रं त्रिसहस्राङ्गलवर्षप्राग्वर्तीति बहव एव मन्यन्ते। तेन गौतम उलूकश्च

---

[१५] Vaisesika Philosophy, p. 16, & Indian Logic in the early Schools, intro, p. 7 – Ft note - 1

समानकालीन इत्यपि मतं केषाञ्चित्। उभावेव शिवावतारसोमशर्म्मणः शिष्यौ, गौतम आद्य उलूकश्च तृतीयः शिष्यः। अत उक्तं लिङ्गपुराणे –

जातुकर्ण्यो यदा व्यासो भविष्यति तपोधनः।

तदाप्यहं भविष्यामि सोमशर्मा द्विजोत्तमः।।

अक्षपादः कुमारश्च उलूको वत्स एव च।

तत्रापि मम ते शिष्या भविष्यन्ति तपोधनाः।।

श्रीश्रीजीवन्यातीर्थमतानुसारं किन्तु वैशेषिकसूत्रं न्यायसूत्रादर्वाचीनम्, यतो हि न्यायसूत्रे केवलं श्रुतिप्रमाणं दृश्यते, वैशेषिकसूत्रे किन्तु बहूत्रैव स्मृतिप्रमाणमपि दृश्यते[१६]। अपि च न्यायसूत्रे विषयविन्यासः संक्षेपेण दृश्यते, वैशेषिकसूत्रे च बहुसूत्रैर्विस्तारेण विषयपर्यालोचनं दृश्यते[१७]। एवं दृश्यते अतिप्राचीनमेव वैशेषिकदर्शनम्।

**वैशेषिकसूत्रग्रन्थपरिचयः**

वैशेषिकसूत्राणि दशभिरध्यायैर्विभक्तम्, प्रत्येकमध्याये द्वे आह्निके स्त इति विंशत्याह्निकैः पूर्णं वैशेषिकदर्शनम्। प्रथमाध्यायस्य प्रथम आह्निके एकत्रिंशत् सूत्राणि, द्वितीये आह्निके सप्तदश सूत्राणि, द्वितीयाध्यायस्य प्रथम आह्निके एकत्रिंशद् द्वितीये च सप्तत्रिंशत्, तृतीयाध्यायस्य प्रथमे

---

[१६] कि.व., सम्पा. गौरीनाथ-शास्त्री-सम्पा, पृ.-३

[१७] Calcutta Review, Vol. 183. No. 3. P. 341-9

ऊनविंशतिर्द्वितीये आह्निके च एकविंशतिः सूत्राणि, चतुर्थाध्यायस्य प्रथमे त्रयोदश द्वितीये च एकादश सूत्राणि, पञ्चमाध्यायस्यादिमे अष्टादश द्वितीये च षड्विंशतिः, षष्ठाध्यायस्य प्रथमे षोडश द्वितीये अपि षोडश, सप्तमाध्यायस्य प्रथमे पञ्चविंशतिः द्वितीये च अष्टाविंशतिः, अष्टमाध्यायस्यादिमे एकादश द्वितीये चाह्निके षट् सूत्राणि, नवमाध्यायस्य प्रथमे पञ्चदश द्वितीये च त्रयोदश सूत्राणि, दशमाध्यायस्य प्रथमे सप्त द्वितीये आह्निके च नव सूत्राणि सन्ति[१८]।

कणादसूत्रस्य प्राचीनतमम् एकं व्याख्यानं रावणभाष्यमासीत्, यच्च नाधुना लभ्यम्। प्रायेण तद् भाष्यं प्रत्येकं कणादसूत्रस्य व्याख्यानरूपमासीदित्यपि भवति श्रुतिपथगम्। भरद्वाजवृत्तिनामकस्तत्परवर्त्ती प्राचीनो व्याख्यात्मको ग्रन्थोऽप्यासीत्कश्चन प्रत्येककणादसूत्रव्याख्यानरूपः, सोऽपि सम्प्रत्यलभ्यः। शङ्करमिश्रकृतम् उपस्कारव्याख्यानम् अपि प्रत्येकसूत्रव्याख्यानम्। रावणभाष्यं भरद्वाजवृत्तिञ्च विहाय अन्यत् प्राचीनं भाष्यं तावत् प्रशस्तपादभाष्यम्। एतद् भाष्यम् एवावलम्ब्य उत्तरकाले नैके ग्रन्था व्याख्यानानि वृत्तयः टीकाश्च रचिताः।

प्रशस्तपादभाष्यमवलम्ब्य श्रीधरभट्टकृता न्यायकन्दली उदयनाचार्यरचिता च किरणावली प्रसिद्धा। किरणावलीमाश्रित्य

---

[१८] वै.द., सम्पा. अमितभट्टाचार्यः

वर्धमानोपाध्यायेन प्रकाशः, प्रकाशमवलम्ब्य रुचिदत्तेन प्रकाशविवृतिश्च अरच्यत। प्रशस्तपादभाष्यमवलम्बिनी वल्लभाचार्यकृता न्यायलीलावती, न्यायलीलावत्याश्रितः शङ्करमिश्रकृतः प्रकाशः, प्रकाशाश्रयिणी भगीरथठक्कुरकृता प्रकाशविवृतिः, प्रकाशाश्रिता रघुनाथशिरोमणिकृता दीधितिः, तद्दीधिते रहस्यम्, मथुरनाथेन कृतः लीलावतीप्रकाशः, दीधितिरहस्यम्, मथुरानाथकृतं लीलावतीप्रकाशरहस्यञ्च प्रसिद्धम्।

प्रशस्तपादभाष्याश्रिता व्योमशिवाचार्यरचिता व्योमवती नाम टीका अपि विद्यते। जगदीशतर्कालङ्कारकृता भाष्यसूक्तिः, श्रीवत्साचार्यरचिता लीलावती वृत्तिरपि उल्लेखार्हा। प्रशस्तपादभाष्यमवलम्ब्य शङ्करमिश्रविरचितं कणादरहस्यम्, पद्मनाभमिश्ररचितः सेतुः, मल्लिनाथसूरिरचितो भाष्यनिकर्षग्रन्थः अपि राजते। पक्षधरमिश्रकृत उदयनाचार्य-विरचित-किरणावल्याश्रितः प्रकाशः, पद्मनाभमिश्रेण विरचिता किरणावली-भास्करटीका अपि अस्ति।

कणादसूत्रमवलम्ब्य जयनारायणविरचिता कणादविवृतिः अपि विद्यते। किञ्च वैशेषिकदर्शनाश्रितं जगदीशतर्कालङ्कारकृतं तर्कामृतम्, पदार्थतत्त्वनिर्णयः, केशवमिश्रविरचिता सप्तपदार्थी, रघुनाथशिरोमणिकृतं पदार्थतत्त्वनिरूपणम् इत्यादयः प्रकरणग्रन्था अपि विराजन्ते। विद्यते च तर्कसङ्ग्रहः तर्कसङ्ग्रहदीपिका च यत्र न्यायवैशेषिकयोरुभयोरालोचनं

विलसति, सन्ति च तर्कसङ्ग्रहस्य तद्दीपिकायाश्च भूयशो व्याख्यानानि। विश्वनाथन्यायपञ्चाननप्रणीता भाषापरिच्छेदमुक्तावली, तस्याश्च नैकाः टीका विद्यन्ते। इत्थं बहुतरग्रन्थरत्नमरीचिभास्वरमिदं दर्शनं स्वसमृद्धिं भासयद्विद्यतेतराम्।

# द्वितीयः अध्यायः

## न्यायकन्दलीकार-किरणावलीकार-परिचयः

### श्रीधराचार्यस्य परिचयः

षट्पञ्चाशद् राढीयादिस्थानेषु बहूनि विद्यास्थानरूपेण प्रसिद्धानि अभूवन्। तेषु भूरिश्रेष्ठनामनो ग्रामस्य उत्कर्ष आसीत् सर्वविषयावगाही। (इदं भूरिश्रेष्ठनामकं स्थानम् एव इदानीं भूरसुट् इति नाम्ना ख्यातम्।) आदिशूरानीतस्य काश्यपगोत्रीयस्य वीतरागस्य कस्यचित् प्रपौत्रस्य शासनभूमितया ग्रामोऽयं प्रदत्त आसीत्[१९]। न्यायकन्दल्या अन्तिमे आत्मपरिचयवर्णनावसरे श्रीधराचार्येण उक्तम् –

आसीद्दक्षिणराढायां द्विजानां भूरिकर्म्मणाम्।

भूरिसृष्टिरिति ग्रामो भूरिश्रेष्ठिजनाश्रयः[२०]।। 3इति।

यथा अम्भोधेश्चन्द्रमस उत्पत्तिः तथा भूरिसृष्टिस्थानात् जगदानन्दकृद् मेदिनीचन्द्रसन्निभो बृहस्पतिनामा विप्र उदभूत्। बृहस्पतेश्च

---

[१९] ब.न.च., सम्पा. दीनेशचन्द्र भट्टाचार्य, पृ.- ३ (अवतरणिका)

[२०] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ६९९

सुतः कीर्त्तिमान् बलदेवनामा आसीत्, स एव श्रीधराचार्यस्य पिता आसीत्। उक्तं च –

अम्भोराशेरिवैतस्माद् बभूव क्षितिचन्द्रमाः।
जगदानन्दकृद्वन्द्यो बृहस्पतिरिति द्विजः।।४
तस्माद्विशुद्धगुणरत्नमहासमुद्रो
विद्यालतासमवलम्बनभूरुहोऽभूत्।
स्वच्छाशयो विविधकीर्त्तिनदीप्रवाह-
प्रस्यन्दसम्पदबलो बलदेवनामा[२१]।।५

श्रीधराचार्यः प्रायेण त्रयोदशोत्तरोनविंशतिशतततमे शकाब्दे कायस्थराज-पाण्डुदासस्याश्रयेण न्यायकन्दलीं नाम प्रशस्तपादभाष्यटीकां रचयाञ्चकार। इयं टीका व्योमशिवाचार्यरचित-व्योमवत्याः परं किरणावल्याश्च परमरच्यत। दृश्यते किरणावल्या बहुत्रैव श्रीधराचार्यमतखण्डनम्, तच्च वयं परमालोचयामः।

श्रीधराचार्यः अपि वाचस्पतिमिश्र इव षड्दर्शनव्युत्पन्नः सर्वतन्त्रस्वतन्त्र आसीत्। तद्रचितग्रन्थेषु नूनमान्यतम्यं भजते वैशेषिकदर्शनस्य प्रशस्तपादभाष्यस्य टीका न्यायकन्दली, इयञ्च न्यायकन्दली वैशेषिकदर्शनस्य प्रमाणग्रन्थतया भारतवर्षस्य बहुत्रैव विश्रुताभवत्[२२]। तदीयन्यायकन्दल्यामेव बहुत्र प्रकटं तस्य न्यायदर्शनवैदग्ध्यमपि, अतो

---

[२१] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ६९९

[२२] ब.न.च., सम्पा. दीनेशचन्द्र भट्टाचार्य

न्यायदर्शनविषयकग्रन्थाभावो न तदपकर्षसाधको भवति कथञ्चित्। अद्वयसिद्धिर्नाम वेदान्तप्रकरणस्य ग्रन्थस्तेन रचितः, पूर्वमीमांसादर्शनस्य च द्वौ ग्रन्थौ रचितौ तत्त्वसंवादिनी इति तत्त्वप्रबोध इति च।

**किरणावलीकारस्य उदयनाचार्यस्य परिचयः**

न्यायवैशेषिकदर्शनोदधौ श्रीमदुदयनाचार्यो हि भास्वररत्नसन्निभः प्राचीनन्यायप्रस्थानस्य चरम आचार्यः। गोतमकृत-सूत्राणि अवलम्ब्य रचिता ये चत्वारो निबन्धा वात्स्यायनकृतं भाष्यम्, उद्द्योतकरकृतं वार्त्तिकम्, वाचस्पतिमिश्रकृता तात्पर्यटीका, उदयनकृता तात्पर्यपरिशुद्धिश्च इति चतुर्ग्रन्थीति नाम्ना हि विश्रुताः। स खलु नव्यन्यायस्यापि आदिमो गुरुरिति शक्यं वक्तुम्।

उत्तरकाले वैशेषिकदर्शनीयपदार्थसप्तकम् अवलम्ब्य न्यायदर्शनीयप्रमाणचतुष्टयं चाश्रित्य प्रचलतो नव्यन्यायस्य उद्बोधक आचार्य उदयन एव। उदयनाचार्येण वैशेषिकतत्त्वं प्रतिपादयता उपमानशब्दयोः पृथक् प्रामाण्यम् अङ्गीकृतम्। अपरतश्च स्वप्नज्ञानं निरूपयता न्यायमतम् अननुसृत्य वैशेषिकमतानुसारं स्वप्न एकविधस्मृतितया वर्णितः।

स्वकीयानवद्यमननज्योतिषा तत्कालीनानात्मवादि-बौद्ध-मतानां खण्डनं स्वरचिताभ्याम् आत्मततत्त्वविवेक-न्यायकुसुमाञ्जलिग्रन्थाभ्यां चक्रे। एवम् आहुः ऐतिहासिका कुमारिलभट्टोदयनाचार्याभ्याम् अकृते हि

खण्डने बौद्धमतानां भारतीयानाम् अस्माकं जीवनं न कदापि बौद्ध-प्रभाव-पराहत-दशानिर्मुक्तम् अभविष्यत्।

अत एव नव्यनैयायिका तन्मतम् आचार्यमतम् इति प्राहुः।

आचार्य उदयनः तार्किकः अपि नासीत् नीरसः। अत एव तदीयन्यायकुसुमाञ्जलौ दृश्यते मङ्गलाचरणे तस्य ईशं प्रति सभक्ति समर्चनम् –

सत्प्रक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः।
ईशस्यैव निवेशितः पदयुगे भृङ्गायमाणं भ्रम-
चेतो मे रमयत्वविघ्नमनघो न्यायप्रसूनाञ्जलिः।।[२३] इति।

अपि चोक्तम् –

न्यायचर्चेयमीशस्य मननव्यपदेशभाक्।
उपासनैव क्रियते श्रवणानन्तरागता।।[२४]इति।

---

[२३] न्या.कु., १.१
[२४] न्या.कु., १.३

**उदयनाचार्यस्य कालः**

तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः।

वर्षेषुदयनश्चक्रे सुबोधां लक्षणावलीम्।। इति लक्षणावलीस्थश्लोकदर्शनेन तस्य षडुत्तरनवशततमशकाब्दस्थायित्वं (९०६-शकाब्दस्थायित्वम्) चतुरशीत्युत्तरनवशततमखृष्टवर्षस्थायित्वं (९८४-खृष्टवर्षस्थायित्वम्) वा प्रतीयते। किन्तु साम्प्रतिका विद्वांसस्तु श्लोकस्यास्य प्रामाण्यं नाङ्गीकुर्वन्ति।

न्यायलीलावतीकारेण वल्लभाचार्येण स्वग्रन्थे उदयनस्य वर्णनम् आचार्यत्वेन न कृतम्। स्थलद्वये उदयनखण्डनम् अपि कृतम्। अतो हि श्रद्धातिरेकविरहदर्शनात् नैके उदयनाचार्यवल्लभाचार्ययोः कालव्यवधानम् अल्पं मन्यन्ते। भट्टवादीन्द्रः तथा चित्सुखाचार्यः एवं चान्ये खृष्टीयत्रयोदशशताब्दीया विद्वांसः स्वकृतिषु तस्य नाम उल्लिलेख। अतो विबुधा आचार्यं प्रायेण द्वादशशतककालीन इति मन्यन्ते।

**उदयनाचार्यस्य देशः**

उदयनाचार्येण स्वजन्मना कतमो देशः अलङ्कृत इति नाद्यापि वेद्यते। तस्य मिथिलनिवासित्वं तु अस्ति प्रसिद्धम्। तस्य गौडीयत्वं तु न कथमपि सम्भवति। उक्तं तेन कुसुमाञ्जलेः तृतीयस्तवके –

सारस्वताः काण्यकुब्जा गौडा उत्कलमैथिलाः।

पञ्च गौडा इति ख्याता विन्ध्यस्योत्तरवासिनः।। इति। अत्र आचार्येण गौडमीमांसकानां वेदाज्ञतां कथयता प्राभाकरसम्प्रदायस्य शालिकनाथं प्रति यादृश उपालम्भो विहितः तेन तस्य गौडीयत्वप्रतीतिरपगता भवति, मैथिलेयत्वम् अपि तस्य दुर्वचं गौडे एव मिथिलाया अन्तर्भावितत्वात्। अतः केचन तं द्राविडात् मिथिलागतं मन्यन्ते।

**किरणावलीपरिचयः**

यद्यपि किरणावलीनाम्नी इयं टीका वैशेषिकदर्शनस्य अतिप्रसिद्धा टीका, तथापि किञ्चिद्दुर्दैववशाद् एव आचार्येण इयं टीका समाप्तिं न नीता इत्यतः अप्राप्तकलेवरा एव इयं राजमाना स्वप्रभां वितरति। आचार्योदयन-रचिता अखिला एव ग्रन्था नूनम् अतिकाठिन्य-क्लिष्टाः। कुसुमाञ्जलौ आत्मतत्त्वविवेके च शास्त्रार्थशैलीम् अनुसरता परमतशातनाय नितरां ससंयमं परिमितवाचः प्रयुक्ताः। किन्तु टीकारूपे प्रशस्तपादव्याख्याने किरणावल्याम् अपि दृश्यते सैव शैली। तदीयमितभाषित्वात् तद्ग्रन्थबोधः अतिशयाभिनिवेशसहितश्रमम् अपेक्षते। अत एव तदुत्तरवर्त्तिन नैके आचार्याः किरणावलीम् आश्रित्य टीका रचयाञ्चक्रुः। तासां टीकानां साहायकमृते ग्रन्थग्रन्थिभेदनं दुश्शकम्।

# तृतीयः अध्यायः

## वैशेषिकदर्शने पदार्थतत्त्वम्

वैशेषिकसूत्रकारेण महर्षि-कणादेन निःश्रेयसहेतु-रूप-तत्त्वज्ञान-जनक-साधर्म्यवैधर्म्य-ज्ञान-जनक-ज्ञान-विषयत्वेन षट् पदार्था उक्ताः। तदुक्तं तेन – 'धर्मविशेषप्रसूताद् द्रव्यगुणकर्म्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्[२५]' इति। सूत्रे हि महर्षिणा स्पष्टम् इदम् उल्लिखितं यत् निःश्रेयसं तत्त्वाज्ञानाद् भवति, तत्त्वज्ञानं च भवति साधर्म्यवैधर्म्याभ्याम्, साधर्म्यवैधर्म्यज्ञानं च द्रव्यादीनां ज्ञानम् ऋते न भवतीत्यतः तेषां पदार्थानां ज्ञानमावश्यकम्। तथाहि महर्षिणा पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मनश्च इति नव द्रव्याणि निरूपितानि। रूपं रसो गन्धः स्पर्शः संख्या परिमाणं पृथक्त्वं संयोगो विभागः परत्वम् अपरत्वं बुद्धिः सुखं दुःखम् इच्छा द्वेषः प्रयत्नश्च इति सप्तदश गुणा निरूपिताः। उत्क्षेपणम् अपक्षेपणम् आकुञ्चनं प्रसारणं गमनम् इति पञ्चविधं कर्म निरूपितम्। द्रव्यगुणकर्मणां ततः साधर्म्यवैधर्म्यनिरूपणानन्तरं द्रव्यलक्षणं निरूपितम् –

[२५] वै.सू. - १. १. ४

'क्रियागुणवत् समवायिकारणम् इति द्रव्यलक्षणम्'[२६], गुणलक्षणं च – 'द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्'[२७], कर्मलक्षणं तथा – 'एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम्'[२८] इति च। ततो महर्षिणा सत्ता व्याख्याता। सत्तासद्भावे प्रमाणम् एवं निरूपितं तेन – 'सदिति यतो द्रव्यगुणकर्म्मसु सा सत्ता'[२९] इति।। ततश्च सामान्यस्य परत्वापरत्वे बुद्ध्यपेक्षे इति तत्त्वम् अपि प्रतिपादितम्। महर्षेः पृथिव्यादीनां लक्षणकरणावसरे असाधारणधर्मगुणानां विन्यासक्रमो नितरां लक्षणीयः – रूपरसगन्धस्पर्शवती पृथिवी, रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाः, तेजो रूपस्पर्शवत्, स्पर्शवान् वायुः, त आकाशे न विद्यन्ते इति च। रूपरसगन्धस्पर्शानामेकैकशः राहित्यप्रदर्शनेन आदौ लक्षणं कृतम्, ततश्च तेषाम् अपरो यो धर्मविशेषः स उल्लिखितः। अन्ततश्च आकाशस्य तद्गुणचतुष्टयस्य एकस्यापि अभावात् केवलम् अभावमुखेनैव लक्षणं कृतम्। किन्तु तर्हि कथम् आकाशस्य द्रव्यत्वेन ज्ञानम् इति शङ्कया तत आकशासिद्धिः प्रदर्शिता। 'स्पर्शश्च वायोः[३०]' 'न दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः[३१]' इति अदृष्टाश्रयस्पर्शलिङ्गेन अनुमानेन वायोः द्रव्यत्वेन ज्ञानं

---

[२६] वै.सू. - १. १. १५

[२७] वै.सू. - १. १. १६

[२८] वै.सू. - १. १. १७

[२९] वै.सू. - २. १. ७

[३०] वै.सू. - २. १.९

[३१] वै.सू. - २. १. १०

सिध्यति। वायुनिरूपणानन्तरम् आकाशस्यापि अनुमेयत्वं संसाधितं कणादपादेन। तत्र लिङ्गं निष्क्रमणं प्रवेशनम् इति। 'अपरस्मिन् अपरं युगपत् चिरं क्षिप्रम् इति काललिङ्गानि'[३२] इति कालसाधकानि लिङ्गानि प्रदत्तानि। प्रदत्तानि। जन्यद्रव्याणां कारणम् अपि कालो भवति, तत्र कारणम् अपि प्रदर्शितम् – 'नित्येष्वभावादनित्येषु भावात् कारणे कालाख्येति'[३३] इति। ततो दिग् अपि व्याख्याता। अत्र च विवृतं यद्यपि एकैव दिक् तथापि उपाधिभेदेन तस्या बहुत्वं प्रतीयते। आत्मसाधनविषये एवं व्याख्यातम् इन्द्रियाणां रूपादिसाक्षात्कारेण एव आत्मा अनुमेयः, साक्षात्कारस्य गुणत्वात् नूनं तस्य किञ्चिद्द्रव्यनिष्ठत्वम् अङ्गीकर्तव्यम्। अपि चोक्तं सूत्रम् – 'प्राणापान-निमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि[३४]' इति। पञ्चमाध्याये वर्णितानां विषये किञ्चित् निरूपणीयम्, 'अपां संयोगाभावे गुरुत्वात् पतनम्[३५]' इति सूत्रेण महर्षिणा गुरुत्वव्याख्यानावसरे वर्षणनिरूपणं विहितम्। ऊर्ध्वस्थितानाम् अपां हि संयोगाभावे सति गुरुत्वे जाते तेषां पतनं भवति, ता एव पतन्त्यो वर्षारूपा भवन्ति। एवं कथम् अपाम् उद्गमनं भवतीत्यपि व्याख्यातं महर्षिणा – 'नाड्यो

---

[३२] वै.सू. - २. २. ६

[३३] वै.सू. - २. २. ७

[३४] वै.सू. - ३. २. ४

[३५] वै.सू. - ५. २. ३

वायुसंयोगादारोहणम्[३६]’ इति। सूर्यमरीचयो वायुसंयोगेन जलानि ऊर्ध्वम् आकृषन्ति। कथं च तत्र ऊर्ध्वे जलां संघातो विलयनञ्च भवति तत्रापि तेजस्संयोगो हेतुतया निर्दिष्टः। ननु कस्तावत् कथं वा तत्र तेजस्संयोगसम्भव इति व्याख्यानावसरे उक्तं महर्षिणा – तत्र विस्फूर्जथुर्लिङ्गम् इति। तत्र अग्निसंयोगस्य उत्पत्तिरपि कथं भवति प्रतिपादितम् – ‘अपां संयोगाद्विभागाच्च स्तनयित्नोः[३७]’ इति।

[३६] वै.सू. – ५. २. ५

[३७] वै.सू. – ५. २. ११

# चतुर्थः अध्यायः

## पदार्थविषये न्यायकन्दलीकिरणावल्योस्तुलनात्मकम् आलोचनम्

'धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्'[३८] इति कणादसूत्रे षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुतया उल्लिखितम्। साधर्म्य-वैधर्म्य-तत्त्वज्ञानस्य तु षट्पदार्थापेक्षतया षट् पदार्था एव ज्ञातव्याः।

अत्र न्यायकन्दलीकारमते पदार्थानां साधर्म्यं वैधर्म्यम् एव तत्त्वम्, तस्य च ज्ञानं निःश्रेयसहेतुः।[३९] किरणावलीकारमते किन्तु द्रव्यादीनां तत्त्वस्य प्रतिपादनं साधर्म्यवैधर्म्याभ्यां साध्यम्[४०], अतस्तन्मते न साधर्म्यवैधर्म्ये एव तत्त्वम्। पदार्थधर्मसङ्ग्रह इति पदव्याख्याने कन्दलीकारेण पदार्थानां धर्माः साधारणासाधारणस्वभावा इति साधर्म्यवैधर्म्ये एव अङ्गीकृते।[४१] किन्तु तत्त्वपदव्याख्यानवेलायां कन्दलीकृता *यस्य वस्तुनो यो भावो यत्स्वरूपस्तत्तस्य तत्त्वम्* इति निरूपितम्। तथात्वे साधर्म्यवैधर्म्ययोः न तत्त्वत्वं सम्भवेत्। साधर्म्यं सादृश्यविशिष्टो धर्मः, वैधर्म्यं वैसादृश्यविशिष्टो धर्मः, वस्तुनश्च स्वरूपं न कथञ्चित् सादृश्यवैसादृश्यघटितं भवितुम् अर्हति। किन्तु वस्तुधर्माणां सादृश्यवैसादृश्यनिर्णयेन तु वस्तुतत्त्वनिर्णयः सङ्गच्छते

---

[३८] वै.सू. - १

[३९] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-२३

[४०] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-३९

[४१] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-१२

इति किरणावलीकारस्य मतमेव वरमिति मन्ये। उक्तं हि तेन – 'तत्त्वमनारोपितं रूपं तच्च साधर्म्यवैधर्म्याभ्यामेव विविच्यते। साक्षादपि हि दृश्यमाना अत्यन्तासङ्कीर्णाः स्थाण्वादयो वक्रकोटरादिभिः पुरुषादिभ्यो विविच्यन्ते न त्वन्यथा किं पुनरतीन्द्रिया मिथो विमिश्रीभूताः कालाकाशादयः शरीरमात्मादयो वेति।'[४२] यद्यपि कन्दलीकार- व्याख्यानं 'षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः' इति भाष्यानुसारि भवति तथापि किरणावलीकारव्याख्यानं तु 'पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानात्' इति सूत्रानुगं भवति।

तेजोऽभावे सति रूपविशेषः तम इति कन्दलीकारमतम्। तमसो नीलाकारता प्रत्यक्षसिद्धा। वस्तुतः प्रतियोगिनि गृह्यमाणे संयुक्तविशेषणतासन्निकर्षेण प्रतियोगिप्रतिषेधमुखेन अभावो गृह्यते, न स्वतन्त्रः। परं तमसि गृह्यमाणे तु नान्यस्य ग्रहणं भवति। न खलु प्रतिषेधमुखः प्रत्ययः, अतो न तमः अभावः।

इदं तमः, इयं छाया इति कृष्णाकारप्रतिभासनात् तमो न आलोकादर्शनमात्रम्। तस्मात् तेजोऽभावे सति सर्वतः समारोपितो रूपविशेषः तम इति स्यात्। यदा हि नियतदेशाधिकरणो भासामभावः तदा तावद्देशसमारोपिते नीलिम्नि छाया इति अवगमः। ततश्च दीर्घा, ह्रस्वा, महती,

[४२] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-३६

अल्पीयसी छाया इति अभिमानः, तद्देशव्यापिनो नीलिम्नः प्रतीतेः, अभावपक्षे च भावधर्माध्याहारोऽपि भवति दुरुपपादः। उक्तं च –

न च भासामभावस्य तमस्त्वं वृद्धसम्मतम्।

छायायाः कार्ष्णमित्येवं पुराणे भूगुणश्रुतेः।।

दूरासन्नप्रदीपादेर्महदल्पचलाचला।

देहानुवर्त्तिनी छाया न वस्तुत्वाद्विना भवेत्।। इति।

एवं क्वचिच्छायायां कृष्णसर्पभ्रमः दुरुपपादो भवेत्, चलतिप्रत्ययोऽपि गच्छत्यावरकद्रव्ये यत्र तेजसोऽभावस्तत्र तत्र रूपोपलब्धिकृतः। ननु आलोकं विना कथं तमोरूपविशेषस्य प्रत्यक्षत्वमिति चेन्न, आलोकाभावव्यञ्जनीयरूपविशेषे तमसि आलोकानपेक्षस्यैव चक्षुषः सामर्थ्यम्, यथालोकाभाव एव त्वन्मते। ननु तर्हि सूत्रविरोधः 'द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भावस्तमः' इति चेन्न, प्रकाशाभावे सति तमसः प्रतीतेः प्रकाशाभावस्तम इत्युक्तम्।

अपि च श्रीधरभट्टेन 'तमो नाम रूप-संख्या-परिमाण-पृथक्त्व-परत्वापरत्व-संयोग-विभागपरत्वापरत्ववेगवद् द्रव्यान्तरमस्तीति चेत्?' इत्यादिना तमसो सप्तपदार्थेषु द्रव्ये अन्तर्भावं निराकृत्य, 'तर्हि भासाम् अभाव

एवायम्?’ इत्यादिना अभावस्वरूपतां खण्डयित्वा तमो रूपविशेष इति तस्य गुणे अन्तर्भावं संसाधितवान्।

उदयनाचार्येण किन्तु इह तमसः क्रमेण गुणकर्मसामान्यविशेषसमवायेषु अनन्तर्भावं संसाध्य ततो नवद्रव्येषु अपि अनन्तर्गमनं प्रदर्श्य रूपितया क्रियावत्तया च तद् दशमं द्रव्यम् इति पूर्वपक्षमतम् उपस्थापितम्। ततस्तु तमोऽभावस्वरूपम् इति स्वमतं प्रतिष्ठापितम्। श्रीधरभट्टमतं किरणावलीकारेण एवं खण्डितम् - ‘सोऽपि (भाऽभावोऽपि) कथमालोकमन्तरेण प्रतियोगिस्मरणाधिकरणग्रहणविरहे विधिमुखेन च चाक्षुष इति चेन्न।

यद्ग्रहे हि यदपेक्षं चक्षुस्तदभावग्रहेऽपि तदपेक्ष्यते। तदालोकाभावेऽप्यालोकापेक्षा स्याद्, यद्यालोके तदपेक्षा स्यात्। न त्वेतदस्ति, प्रत्युत विरोध एव। तस्मिन् सति तदभाव एव न स्यात् किं तदपेक्षेण चक्षुषा गृह्येत। एवं हि तदितरसामग्रीसाकल्यं स्यात्।... विधिमुखप्रत्ययः असिद्धः। न हि नञोऽप्रयोग इत्येव विधिः। प्रलयविनाशावसानादिषु व्यभिचारात्। नञर्थान्तर्भावेन वाक्यार्थे पदप्रयोग इति तु समं समाधानमन्यत्राभिनिवेशात्।

गतेः का गतिरिति चेद् भ्रान्तिः। स्वाभाविक्यां गतावावरकद्रव्यानुविधानानुपपत्तेः। प्रभातुल्यत्वे तेजःप्रभाश्रयेषु रत्नविशेषेषु छाया दिवसे न स्यात्। छायया एव तदभिभवे वहुलतमे तमसि तेषामालोको न

स्यात्। आलोकान्तरेण चाभिभवे छायाया अप्युद्भवो न स्यात्। तस्मादावरकद्रव्ये गच्छति यत्र यत्र तेजसोऽसन्निधिस्तत्र तत्र छायाग्रहणाद् अन्यदेशतानिबन्धनो गतिभ्रम इति।

कथं भावधर्माध्यारोपोऽभाव इति चेत्, न किञ्चिदेतत्। सारूप्यतत्त्वाग्रहाविह निबन्धनं न त्वन्यत्। दृष्टश्च दुःखाभावे सुखत्वाध्यारोपः। यथा दुःखापगमे सुखिनः संवृत्ताः स्मः। संयोगाभावे विभागत्वाभिमान इति। एतेन नीलिमाध्यारोपो व्याख्यातः। शुक्लभास्वरविरोधित्वसारूप्येण तदारोपोपपत्तेः।

न चैवं तदन्यारोपप्रसङ्गोऽपि। आरोपे सति निमित्तानुसरणात्, न तु निमित्तमस्तीत्यारोपः। अदृष्टादिकञ्चात्र नियामकमध्यवसेयम्। स्मर्यमाणञ्चैतद् रूपमारोप्यते रजतत्ववत्, न तु गृह्यमाणम्। अतो न सहकार्यपेक्षाचोद्यमाशङ्कनीयम्, धर्मिणि निरपेक्षत्वात्।

यद्येवम् आरोपितं रूपं न, तमो भाऽभावस्तु तद् इति विनिगमनायां को हेतुरिति चेद्, उच्यते। एषा तावद् अनुभवस्थितिः, तमो नीलं न तु नीलिमा तम इति। न चारोपे तेन वास्तवेन निलिम्ना तमोबुद्धिव्यपदेशौ समानार्थौ सहप्रयोगानुपपत्तेः। नीलद्रव्योपरक्तेषु वस्त्रचर्मादिषु तमोबुद्धि-व्यपदेश-प्रसङ्गाच्च। अवश्यम्भावी च भाभावानुभवो निरालम्बनस्य भ्रमस्यानुपपत्तेः।

न च तमःप्रत्ययो बाध्यते नीलप्रत्ययस्तु बाध्यत इह इति प्रत्ययवत्। तस्माद् यत्र गुणक्रियारोपस्तदन्धकारं न तु नीलिमेति सुष्ठूक्तं नवैवेति।[४३]’

अत्रेदं वक्तव्यम्, कन्दलीकारेण यथोच्यते तेजोऽभावे सति रूपविशेषः तम इति, तत्र इदमपि चिन्त्यम्, रूपं गुणः, गुणो गुणिनि तिष्ठति। तमो यदि रूपं कस्तर्हि तत्र तद्गुणस्य आश्रयः, अत आश्रयानुपपत्त्या तमसो रूपत्वं न सम्भवेत्। तस्मात् किरणावलीकारमतस्य याथार्थ्यम् एव उपपन्नं भवति।

**गुणोद्देशप्रकरणे**

‘रूपररगन्धस्पर्शाः सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखेच्छाद्वेषौ प्रयत्नाश्च गुणाः’[४४] इति सूत्रे सप्तदश गुणा उल्लिखिताः। एतत्सूत्रभाष्यस्य व्याख्यानयोः न्यायकन्दली-किरणावल्योः चशब्देन गुरुत्वद्रवत्वस्नेहशब्दधर्माधर्मसंस्काराणाम् अपरेषां सप्तगुणानाम् अङ्गीकरणविषये सत्यपि साम्ये तेषां गुणानाम् अङ्गीकार-कारणता-निरूपणे दृश्यते वैमत्यम्। उदयनाचार्यमते अभ्युपगमसिद्धान्तन्यायेन अन्ये समानतन्त्रसिद्धा गुणाः स्वीकृताः।

महर्षिणा च परवर्तिसूत्रेषु सप्तदशाधिकानाम् अपि गुणानामुल्लेखात् तेषामनङ्गीकारे व्युत्पादनविरोध इति व्याख्यातम्[४५]। न्यायकन्दलीकृता

---

[४३] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-११२

[४४] वै.सू. १.१.६

[४५] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-११५

किन्तु केवलं लोकप्रसिद्धाः गुरुत्वादयो गुणाः चशब्देन समुच्चिता इति व्याहृतम्, तेषां ग्रहणे को हेतुरिति न न्यरूपि[४६]। चतुर्विंशतिगुणातिरिक्ता ये गुणा लोके प्रसिद्धाः तेषां कथं न ग्रहणमिह इति विषये तु किरणावल्यां न तथा किञ्चिद् व्याख्यातम्, परं न्याकन्दल्यां शौर्यौदार्यकारुण्यदाक्षिण्यौग्र्यादयः प्रसिद्धा गुणा अपीहैव भवन्ति अन्तर्भूता इति प्रदर्शितम्[४७]।

ननु गुणाश्चतुर्विंशतिरिति कथं संख्याव्यवहारो गुणानां निर्गुणत्वादिति शङ्कां निराकुर्वता श्रीधराचार्येण 'निर्गुणेष्वपि गुणेष्वसाधारणधर्मयोगित्वेनोपचाराच्चतुर्विंशतिरिति व्यवहारः' इति व्याख्यातम्[४८]। किरणावल्यां किन्तु 'एवं कण्ठोक्त्या समुच्चयेन चैकतया चतुर्विंशतिगुणा व्यवहर्तव्याः। तथाविधबुद्धिविषयतया सारूप्येण न तु संख्यायोगेन।[४९]' इति व्याख्यातम्।

---

[४६] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-३८
[४७] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-३९
[४८] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-४०
[४९] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-११८

**कर्मोद्देशप्रकरणे**

अत्र उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनेभ्यः अतिरिक्तानि कर्माणि भ्रमणादीनि कथं न उल्लिखितानि इति व्याख्यानं न्यायकन्दलीकृता प्रदत्तम्, भ्रमणादयो गमनविशेषाः, गमनग्रहणेनैव तेषां ग्रहणात् नोल्लेखः[५०]। किरणावल्यां तु न तथास्ति व्याख्यानमिति एतावन्मात्रम्।

**सामान्योद्देशप्रकरणे**

'अत्यन्तव्यावृत्तानां पिण्डानां यतः कारणादन्योन्यस्वरूपानुगमः प्रतीयते तत्सामान्यम्' इति अनुवृत्तिप्रत्ययकारणमित्यस्य व्याख्यानतया न्यायकन्दल्यां सामान्यलक्षणं निरूपितम्[५१]। किरणावल्यां तु आदौ पदव्युत्पत्तिनिरूपणेन तत्स्वरूपं प्रकटितम् - 'समानानां भावः स्वाभाविकोऽनागन्तुको धर्मः सामान्यमित्यर्थः।[५२]' ततश्च पर्यवसितं लक्षणं प्रकाशितम् - 'तथा च धर्मिणां बहुत्वे धर्मस्य चानागन्तुकत्वे विवक्षिते नित्यमेकमनेकवृत्ति सामान्यमिति सामान्यलक्षणं सूचितं भवति[५३]' इति।

परापरसामान्यालोचनावसरे उभाभ्यामेव टीकाकृद्भ्यां परसामान्यं सत्ता केवलसामान्यम्, अपरसामान्यं च सामान्यं विशेषश्च इति उभयथा एव भवति

---

[५०] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-४०

[५१] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-४१

[५२] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-११९

[५३] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१२०

इति निरूपितम्। सत्ता यतः स्वश्रयस्य केवलम् अनुवृत्तेः हेतुरतः सामान्यमेव, न तु विशेषः।

सत्ता कथं विशेषो न इति व्याख्यानं कृतं न्यायकन्दल्यां यत्, सत्ता यद्यपि द्रव्यत्वादिसामान्येभ्यः स्वयं व्यावर्त्तते तथापि सा स्वाश्रयं न सामान्यसमवायादिभ्यो न व्यावर्तयितुं शक्नोति, सामान्यसमवायादीनाम् अपि सद्बुद्धिवेद्यत्वात्, अतो न सत्ता विशेषः। किन्तु सत्ता कथं व्यावर्तयितुं न शक्नोति, द्रव्यत्वादिसामान्यं च कथं स्वाश्रयं विजातीयेभ्यो व्यावर्तयति अपि इति न व्याख्यातम्। किरणावल्यां किन्तु तद्विषये कृतं व्याख्यानम्, व्यक्तिमात्रव्यङ्ग्यत्वात् व्यञ्जकनियमाभावाच्च न सत्ताया व्यावर्तकत्वम्, अतो न सा विशेषः। द्रव्यादिसामान्यं तु संस्थानगुणकार्यकारणादिव्यङ्ग्यत्वात् तेषामनियतत्वेन च सर्वत्राभिव्यक्त्यभावाद् व्यावर्तकमपि भवति[५४]।

ननु द्रव्यत्वादिसामान्यं यदि युगपत् सामान्यं विशेषश्च तर्हि कथं तस्य केवलं सामान्ये एव अन्तर्भावो न विशेषे इति शङ्कोत्तरत्वेन न्यायकन्दलीकारमतम् इदं युक्ततरं भाति, 'द्रव्यत्वादिषु सामान्यशब्दो मुख्यः, अनुवृत्तिहेतुत्वस्य सामान्यलक्षणस्य सम्भवात्, विशेषशब्दश्च भाक्तः, स्वाश्रयो विशिष्यते सर्वतः अत्यन्तं व्यवच्छिद्यते येन स विशेष इति

[५४] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१२५

लक्षणस्यात्राभावात्। इदन्तु लक्षणमत्यन्त्यविशेषेष्वस्ति।[55] किरणावलीकारमते अनुवृत्ति-हेतुत्वरूपैक-मात्र-निमित्त-वशात् व्यावृत्ति-हेतु-रूपैक-मात्रनिमित्तवशाच्च सत्तायाम् अन्त्येषु च एकैका संज्ञा, द्रव्यत्वादिसामान्येषु तु निमित्तद्वयसमावेशात् संज्ञाद्वयभाजनं भवति[56], परम् एतत् मतं तु न तादृशशङ्काच्छेदकं न भवततीति मन्ये।

**विशेषोद्देशप्रकरणे**

श्रीधराचार्येण न्यायकन्दल्यां विशेषोद्देशप्रकरणे न तथा विहितं व्याख्यानं यथा उदयनाचार्येण किरणावल्यां कृतम्। उभयोर्मतवैषम्ये एतद्वक्तुं शक्यते – 'ननु किं विशेषा विशेषा एव किं वा द्रव्यत्वादिवदुभयरूपाः?' इत्यादिना विशेषाः केवलविशेषाः, सामान्यरूपा अपि न भवन्ति इति व्याहृतम्। तत्कारणतया च केवलं भाष्यगतपदानां व्याख्यानं कृतम् – 'अत्यन्तं सर्वदा, व्यावृत्तेरेव स्वाश्रयस्येतरस्माद्व्यवच्छेदस्यैव, हेतुत्वात् कारणत्वादिति।[57]' इति।

किरणावलीकारेण किन्तु विशेषा व्यावृत्तिबुद्धिमात्रहेतव इति, विशेषप्रयोजनं च व्याख्यातम्। सामान्यं तावत् न केवलविशेषकार्यसाधकम्, अनेकव्यक्तिवृत्तित्वेन न च अत्यन्तव्यावृत्तिबुद्धिहेतवः अपि। न च गुणैरपि

---

[55] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-४६

[56] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- १२९

[57] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ४७

भवति विशेषकार्यसाधनम्, तेषामपि सामान्यवत्त्वात्। यदि च गुणा निस्सामान्या इति उच्यते तदा गुणत्वस्यैव व्याघातः। तस्मान्न ते केवलविशेषकार्यसाधकाः, व्यावृत्तिबुद्धेरेव हेतुत्वाद्विशेषा एव विशेषा नान्यत्रान्तर्भवन्ति इति ज्ञेयम्[५८]।

**समवायोद्देशप्रकरणे**

'अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः[५९]' इति प्रशस्तपादभाष्यस्य यद् अयुतसिद्धेति पदं, तस्य व्याख्यानं न्यायकन्दल्यां हि वैशद्येन विस्तरेण च दृश्यते, किरणावल्यां तु व्याख्यानं स्वल्पम्। किरणावलीकारेण केवलं प्राप्ताश्च सिद्धा इति अयुतसिद्धा इत्यर्थः कृतः। ये प्राप्ता एव सन्ति नाप्राप्तास्ते अयुतसिद्धाः[६०]।

न्यायकन्दलीकारेण किन्तु एतद्विषये सूक्ष्मम् आलोचनं विहितम्। युतसिद्धिरिति पृथक्सिद्धिः, उभयोः सम्बन्धिनोः परस्परपरिहारेण पृथगाश्रयाश्रयित्वं पृथगवस्थितिः, सा नास्ति ययोः तौ हि अयुतसिद्धौ[६१]। अस्य च स्पष्टीकरणं कृतं परम् अपि। तदुक्तम् – 'अत्र केचिदयुतसिद्धपदं विकल्पयन्ति – किं युतौ न सिद्धौ? आहोस्विदयुतौ सिद्धौ? यदि युतौ न सिद्धौ, कस्तयोः सम्बन्धः, धर्मधर्मिणोरभावात्। अथायुतौ सिद्धौ, तथापि कः

[५८] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१३२

[५९] प्र.पा.भा., सम्पा. जयकृष्णदासः

[६०] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- १३३

[६१] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ४८

सम्बन्धः अपृथक्सिद्धत्वादेव। भिन्नयोर्हि सम्बन्धो यथा कुण्डबदरयोरिति।[६२]' एतेषामुत्तरमपि विहितम्, युतौ न सिद्धौ न निष्पन्नौ इति पक्षो न समीचीनः, असतोः समवायस्य अनभ्युपगमात्। न च अयुतौ सिद्धौ इति पक्षोऽपि युक्तः, अयुतौ सिद्धौ इति एकात्मकौ सिद्धौ, सति च एकात्मकत्वे तु एकम् एव वस्तु, न तूभयम्, उभयरूपताया हि परस्परात्मकत्वाभावात्। परमार्थतस्तदेकं वस्तु इत्यपि न वाच्यम्, तयोराकारयोः परस्परविलक्षणरूपेण प्रतीतेः। विलक्षणाकारबुद्धिवेद्यत्वं हि भेदलक्षणम्, अन्यथा भवत्यनुपपत्तिः भेदाभेदव्यवस्थायाः। तस्मात् स्वरूपाभेदः अपि न अयुतसिद्धिः। किन्तु अयं तु अर्थः अयुतसिद्धानाम् इति परस्परपरिहारेण पृथगाश्रयानाश्रितानाम् इति। तथा सति तु सम्बन्धो न अनुपपन्नो भवति, स्वरूपभेदस्य सम्भवात्, यथा भिन्नयोः दहनायःपिण्डयोः परस्परोपश्लेषस्य सम्बन्धेन विना असम्भवः। विशेषस्तु अत्र अयम्, अग्निः उत्पत्तेः परम् अयःपिण्डेन सह सम्बद्धो भवति, प्रकृतस्थले च स्वकारणसामर्थ्याद् उपजायमानम् एव तत्र सम्बध्यते, छिदिक्रिया छेद्येन यथा।

धर्मस्य सुखस्य च कार्यकारणभावलक्षणः सम्बन्धः, तयोश्च आत्मैकाश्रितयोः युतसिद्ध्यभावात् स सम्बन्धः अपि समवायः स्यात्,

---

[६२] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५०

तत्रातिव्याप्तिवारणाय आधार्याधारभूतानामिति पदम्, न च आकाशशकुनिसम्बन्धनिवृत्त्यर्थम् इति श्रीधराचार्यस्याशयः[६३]।

किरणावलीकारमते किन्तु आधार्याधारभूतानामिति पदेन वाच्यवाचकादिभावलक्षणः सम्बन्धो व्यवच्छिद्यते। आधार्याधारणं हि स्वभावात् न तु आगन्तुकेन धर्मेण, वाच्यवाचकादिलक्षणः सम्बन्धस्तु आगन्तुकः[६४]।

न्यायकन्दल्यां पुनः श्रीधराचार्येण व्याख्यातम् आकाशस्य आकाशपदस्य च वाच्यवाचकभावसम्बन्धस्य समवायत्वापत्तिवारणाय इहप्रत्ययहेतुः इति भाष्यस्थं पदम्। वाच्यवाचकभावे तु तस्मात् शब्दात् तदर्थो ज्ञायते इति प्रतीतिः भवति न खलु इह इदम् इति प्रतीतिः। आधार्याधारभावे सति किन्तु इह इदम् इति भवति प्रतीतिः।

किन्तु किरणावलीकारमते तु तादृशसम्बन्धस्य वारणं भाष्यस्य आधार्याधारभूतानामिति पदेनैव सिद्धं भवति, तादृशसम्बन्धेनाधार्याधारभावस्य असिद्धेः। तन्मते हि इहप्रत्ययहेतुः इति पदं स्वभावादाधार्याधारणं भवति न तु आगन्तुकेन धर्मेण इत्यस्य प्रमाणम्। इह

---

[६३] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-४९

[६४] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१३४

तन्तुषु पट इह दुग्धे धवलत्वम् इहि गवि गोत्वम् इत्यादिप्रतीतयः सम्बन्धम् अन्तरेण नोपपद्यन्ते, अतस्तस्य सम्बन्धविशेषस्य व्यवस्था।

वस्तुतस्तु आधार्याधारभूतानामिति पदेनैव कार्यकारणलक्षणसम्बन्धस्य वाच्यवाचकसम्बन्धस्य च इति उभयोरपि वारणसिद्धेः वाच्यवाचकसम्बन्धस्य व्यवच्छेदाय इहप्रत्ययहेतुः इति पदम् इति कथने सिद्धसाधनदोषो भवति, किन्तु इहप्रत्ययहेतुः इति युक्तेः प्रमाणम् इति कथने न तादृशो दोषो भवतीति उदयनाचार्यमतमिह वरं भवति।

'एवं धर्मैर्विना धर्मिणामुद्देशः कृतः[६५]' इति प्रशस्तपादभाष्यस्य व्याख्यानं कुर्वता न्यायकन्दलीकृता षडतिरिक्ताः पदार्थाः किमर्थं नोद्दिष्टा इति समादधता उक्तं यत् तेषाम् एव पदार्थानां भावात् तदतिरिक्तानां पदार्थानामभावाद् अपरे न उद्दिष्टाः, तेषाम् अभावश्च सर्वैः प्रमाणैः अनुपलभ्यमानत्वाद् एव सिध्यति, शशविषाणवत्[६६]। अतोऽत्र दृश्यते श्रीधराचार्येण अन्येषां पदार्थानाम् अभावः साधितः, ननु प्रतियोगिसत्त्वे एव अभावः साधयितुं शक्यते, नूनम् अत्र प्रतियोगिनो न स्वमतसिद्धाः, सिद्धत्वे अयुक्तं तेषाम् अभावसाधनम्, परमतसिद्धाश्चेत् तेषामभावसाधनेन शक्तिसंख्यासादृश्यादयः अलीकाः प्रतिपद्यन्ते, न खलु ते पदार्था अलीकाः, किन्तु तेषामतिरिक्तत्वं न सिध्यति, षट्पदार्थेषु अन्तर्भावात्। श्रीधराचार्योक्तेन

---

[६५] प्र.पा.भा., सम्पा. जयकृष्णदासः

[६६] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५१

एवम् एव आयाति यत् एते पदार्था अलीका इति, न तु तथा। अत एव किरणावलीकृता तेषां पदार्थानाम् अतिरिक्तत्वं खण्डितं षट्सु एव अन्तर्भावादिति युक्तं किरणावलीकारमतम्[६७]।

**साधर्म्यवैधर्म्यप्रकरणे**

'षण्णामपि पदार्थानां साधर्म्यमस्तित्वाभिधेयत्वज्ञेयत्वम्[६८]' इत्यस्य व्याख्याने न्यायकन्दल्यां श्रीधराचार्येण व्याख्यातं यद् यद्यपि धर्मा अपि षट्पदार्थेभ्यो न अतिरिच्यन्ते, किन्तु अन्योन्यापेक्षया धर्मा एव धर्मिणः अपि भवन्ति इति, तथापि धर्मिरूपतया परिज्ञानार्थं पृथगुद्देशः कृत इति[६९]। अत्र च किरणावलीकार एवम् आह यत् षट्पदार्था एव परस्परमङ्गतापन्नाः परस्परविवेकाय उपयोक्ष्यन्त इत्यतस्तेषां पृथगुद्देशः[७०]।

'षण्णामपि पदार्थानामस्तित्वाभिधेयत्वज्ञेयत्वानि[७१]' इति प्रशस्तपादभाष्यवचनस्य अस्तित्वेति पदार्थसाधर्म्यस्य व्याख्यानं कुर्वता श्रीधराचार्येण उक्तं न्यायकन्दल्यां यत् स्वरूपवत्त्वम् अस्तित्वम्, यद्वस्तुनो यत् स्वरूपं तदेव तस्य अस्तित्वम्[७२]। ननु तथात्वे अभावस्यापि साधर्म्यम् अस्तित्वम् इत्यापद्यते। अतः किरणावलीकारेण तदर्थः कृतः विधिमुख-

---

[६७] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१३७

[६८] प्र.पा.भा., सम्पा. जयकृष्णदासः

[६९] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-५४

[७०] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- ११५

[७१] प्र.पा.भा., सम्पा. जयकृष्णदासः

[७२] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५४

प्रत्ययत्वम् इति, विधिमुखप्रत्ययत्वमिति विधिमुखप्रत्ययवेद्यत्वमिति बोध्यम्, अन्यथा प्रत्ययत्वस्य प्रत्यये एव सद्भावात् पदार्थान्तारे असद्भावात् तद्धर्मसद्भावासम्भवः। किन्तु तथापि अभावोऽस्तीति विधिमुख-प्रत्ययवेद्यत्वस्यापि अभावोऽस्तीति अभावे सत्त्वात् निष्कृष्टः अर्थः कृतः प्रतियोग्यनपेक्षनिरूपणम् इति[७३]।

अभिधेयत्वरूपसाधर्म्यस्य अर्थ एवं प्रतिपादितः श्रीधराचार्येण न्यायकन्दल्याम् अभिधानप्रतिपादनयोग्यत्वम् इति। तदपि वस्तुनः स्वरूपम्[७४]। किरणावलीकारेण त्वत्र अभिधेयत्वम् इत्यस्य अभिधानयोग्यत्वम् इति व्याख्यानं कृतम्। अभिधानयोग्यत्वं च शब्देन सङ्गितलक्षणः सम्बन्धः[७५]।

ज्ञेयत्वम् इति निरूपयता चोक्तं न्यायकन्दल्यां यत् ज्ञेयत्वं हि ज्ञानग्रहणयोग्यत्वम्, तदपि खलु वस्तुनः स्वरूपभूतम् एव। वस्तुस्वरूपम् एव अवस्थाभेदेन ज्ञेयत्वम् अभिधेयत्वं च उच्यते[७६]। किरणावलीकारस्तु इहं ज्ञेयत्वं ज्ञानयोग्यता, तच्च ज्ञाप्यज्ञापकभावलक्षणः सम्बन्ध इत्याह[७७]। एतद्विषये च भाषापरिच्छेदे अपि दृश्यते आलोचनम्। तदुक्तं

---

[७३] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- १३७

[७४] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५५

[७५] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- १३८

[७६] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५५

[७७] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- १३८

विश्वनाथन्यायपञ्चाननेन – 'सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते'[७८] इति। तद्व्याख्याने चोक्तं तेन – 'एवमभिधेयत्वप्रमेयत्वादिकं बोध्यम्' इति।

ततः प्रशस्तपादभाष्यस्य 'आश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः' इति पङ्क्तेर्व्याख्यानावसरे श्रीधराचार्येण आश्रितत्वम् इत्यस्य परतन्त्रतयोपलब्धिः इत्यर्थः कृतः[७९]। किरणावलीकारेण च आश्रितत्वम् इति स्वाभाविकी आधेयता इति व्याख्यातम्[८०]। ननु समवायस्य नित्यत्वे अपि अन्यद्रव्यवृत्तित्वं कुत इत्याशङ्कोत्तरत्वेन श्रीधराचार्येण 'न समवायलक्षणा वृत्तिः, समवाये तदभावात्' इति, किन्तु न तत्कारणं निरूपितम्। उदयनाचार्येण किन्तु उक्तं - 'समवायस्य समवायान्तराभावे अपि स्वभावत एव आधारसन्निकृष्टत्वात्।' इति।

किरणावलीप्रकाशे एतद्विषये च व्याख्यातं यत् यद्यपि नित्यद्रव्याणि अपि आश्रितानि तथापि तेषां ग्रहणमिह न विवक्षितम्, संयोगवृत्त्या तेषां सम्बद्धत्वात्, समवाये अपि यद्यपि आधेयता, तथापि स्वाभिन्नेन इव विशेषणतायाः स्वरूपसम्बन्धानतिरेकात् न अव्याप्तिः, यद्वा संयोगान्यवृत्त्या समवायभिन्नभावत्वं वा विवक्षितम्।

---

[७८] भा.प., सम्पा. पञ्चानन भट्टाचार्य, कारिका - १३

[७९] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५५

[८०] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- १३९

द्रव्यादीनां पञ्चानां साधर्म्यनिरूपणावसरे अनेकत्वविषये दृश्यते किरणावलीकारेण अनेकत्वम् इति स्वरूपभेदःइति प्रत्यपादि[८१], श्रीधराचार्येण तु अनेकत्वम् इति परस्परभिन्नत्वम्, भिन्नत्वं च इतरेतरव्यावृत्तत्वम्, यच्च स्वरूपम् एव[८२] इति प्रायेणोभयोरत्र मतसाम्यमिति दृश्यते।

गुणादीनां साधर्म्यं निर्गुणत्वं निष्क्रियत्वञ्च। श्रीधराचार्येण निर्गुणत्वस्य गुणाभावविशिष्टत्वम्, निष्क्रियत्वस्य च क्रियाभावविशिष्टत्वम् इति व्याख्यातम्[८३]। किरणावलीकारस्य निष्क्रियत्वपदव्याख्याने किञ्चिद् दृश्यते भेदः – क्रियाया असमवायः इति[८४]। ननु भावाभावययोरसम्बन्धाद् गुणाभावविशिष्टत्वं क्रियाभावविशिष्टत्वम् इत्यादौ कथम् अभावौ विशेषणम् इति शङ्कां निराकुर्वता श्रीधराचार्येण व्याख्यातं यत् तधाविधविशिष्टप्रत्यय एव तत्र मानम्, विशिष्टप्रत्ययात् सम्बन्धस्यापि कल्पनम्।[८५] एतद्विषये च किरणावल्यां न दृश्यते आलोचनम्।

द्रव्यादीनां त्रयाणां च साधर्म्यं तावत् सत्तासम्बन्धः, सामान्यविशेषवत्त्वम्, स्वसमयार्थशब्दाभिधेयत्वम्, धर्माधर्मकर्तृत्वं च। तत्र सत्तासम्बन्ध इत्यस्य व्याख्याने न्यायकन्दलीकृता उक्तं यत् सत्तया इति

---

[८१] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१४१

[८२] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५५

[८३] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५७

[८४] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- १४१

[८५] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५७

सामान्येन सह सम्बन्धो हि समवायरूपो द्रव्यगुणकर्मणां साधर्म्यम्।[८६] किरणावलीकारेण अपि अनुरूपं निरूपितम्।

एतद्विषये प्रपञ्चनं तु कृतं श्रीधराचार्येण। तथाहि सत्तया सम्बन्धः सतः असतो वा? अथ सतश्चेत् प्राग् एव सत्तासम्बन्धात् सन्नयम् अर्थ इति व्यर्था तावत् सत्ता, यदि च असतः सम्बन्धः तदा खलु शशविषाणादिषु अपि सत्ता स्यात्। अत्रोच्यते न हि नित्येषु खलु पौर्वापर्याभ्युपगमः, अनित्येषु प्रागेव सत्ता कारणसामर्थ्यतः। शशविषाणादेस्तु उत्पत्तौ कस्यचित्सामर्थ्याभावात् न तत्र अतिप्रसङ्गः।[८७]

सामान्यविशेषवत्त्वञ्च द्रव्यादित्रयस्य अपरं साधर्म्यम्। श्रीधराचार्यमते सामान्यविशेषवत्त्वम् इति समवाय एव, अनुवृत्तिव्यावृत्तिहेतुत्वात् सामान्यविशेषा द्रव्यत्वादयः, तैश्च सम्बन्धः समवाय एव। किन्तु किरणावलीकारेण केवलं 'सामान्यविशेषा द्रव्यत्वादयस्तद्वत्त्वम्' इति। किन्तु प्रकाशकृता तद्व्याख्याने उक्तम् – 'तद्वत्त्वञ्च तत्समवायित्वमित्यर्थः। यद्यपि सामान्यवत्त्वमेवेतरभेदगमकं तथापि सामान्यरूपो विशेष इति विग्रहेण जातिमत्त्वमात्रमत्रोक्तम्।'

---

[८६] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५८

[८७] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५८

स्वसमयार्थशब्दाभिधेयत्वञ्च द्रव्यगुणकर्मणां साधर्म्यम्। श्रीधराचार्येण अत्र वैशेषिकसूत्रम् 'अर्थशब्दाद् द्रव्यगुणकर्म्माणि प्रतिपत्तव्यानि' इति निरूप्य द्रव्यगुणकर्माणि त्रीणि निरुपपदेनार्थशब्देन उच्यन्ते इति प्रतिपादितम्[८८]। किरणावल्यां किन्तु द्रव्यगुणकर्माणि अर्थपदेन अभिधीयन्ते व्यवहारलाघवाय इति प्रयोजनम् अपि निरूपितम्।[८९]

द्रव्यगुणकर्मणां धर्माधर्मनिमित्तत्वम् अपि भवति साधर्म्यम्। अत्र श्रीधराचार्येण व्याख्यातं तावद् यथा एका भूमिः दीयमाना चेद् धर्मकारणम् अपह्रियमाणा चेत् च अधर्मकारणम्। एवं च गुणपक्षे च यथा एकः संयोगो द्वयोः कारणम्, कपिलास्पर्शो धर्मकारणम्, नरास्थिस्पर्शश्च अधर्मकारणम्। कर्मपक्षे च तीर्थगमनं यथा धर्मकारणं तथा शौण्डिकगृहगमनम् अधर्मकारणम्। एतेन द्रव्यगुणकर्मणां धर्मकारणत्वं तथा अधर्मकारणत्वम् इति उभयम् एव विद्यते इति श्रीधराचार्येण प्रतिपादितम्।

किरणावलीकारस्य तु अयम् अत्र विशेषो यद् धर्मकर्तृत्वम् अधर्मरूपगुणं विहाय अधर्मकर्तृत्वञ्च धर्मरूपगुणं विहाय इति प्रतिपादितम्। अन्यथा धर्माधर्मयोरपि गुणान्तर्भूतत्वात् धर्मस्यापि अधर्मजनकत्वापत्तिस्तथा अधर्मस्यापि धर्मजनकत्वापत्तिरिति तादृशाशङ्कावारणाय तथाविध-

---

[८८] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५८

[८९] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- १४२

व्याख्यानम्[९०]। अपि च धर्माधर्मकर्तृत्वम् इत्यत्र त्वप्रत्ययेन धर्माधर्मजननं प्रति द्रव्यादित्रयस्य निजा शक्तिर्विवक्षिता, तत्तद्गता जातिश्च भवति स्वाश्रव्यवच्छेदमात्रेण चरितार्था इति न तयोः कारणं भवतीति श्रीधराचार्यनयः[९१]।

इह किरणावलीकारनये किन्तु द्रव्यगुणकर्मणां विहितनिषिद्धभावनाविष्टानाम् एव धर्माधर्महेतुत्वम्, न तु स्वरूपतः। अपि च जातेर्नित्यत्वेन अव्यापारत्वाद् द्रव्यादिकम् अनन्तर्भाव्य जात्यादिषु भावनावेशो न हि स्वरूपतः सम्भवति, अनित्यधर्मायोगेन अव्यापारितत्वात्। जात्यादेर्ज्ञानमात्रेण उपयोगः अपि न अभियोगवद् अनिषेधात्। अतः स्वाश्रयावच्छेदकमात्रेणैव उपयुज्यते इति राद्धान्तः[९२]।

कारणवतां साधर्म्यं कार्यत्वं तथा अनित्यत्वम्। कारणाधीनः स्वात्मलाभः कार्यत्वम्, स्वरूपविनाशश्च अनित्यत्वम् इति श्रीधराचार्यमतम्[९३]। किरणावलीकारमते तु अभूत्वा भावित्वं कार्यत्वम्, भूत्वा अभावित्वं च अनित्यत्वम् इति[९४]।

---

[९०] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- १४३

[९१] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.- ५९

[९२] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.- १४४

[९३] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-५९, ६०

[९४] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१४५

'कारणत्वं चान्यत्र नित्यद्रव्येभ्यः' इति प्रशस्तपादभाष्यस्य व्याख्यायां श्रीधराचार्येण पारिमाण्डल्यादिभ्य इत्यत्र आदिशब्देन द्व्यणुकपरिमाणम्, आकाशकालदिगात्मनां विभुत्वमन्त्यः शब्दः, मनःपरिमाणम्, परत्वापरत्वे, द्विपृथक्त्वम् अन्त्यावयविपरिमाणं च इत्यादि ग्राह्यम् इति व्याख्यातम्[९५]।

किरणावलीकारेण च आदिशब्देन परममहत्त्वम्, अन्त्यावयवि-रूप-रस-गन्ध-स्पर्शपरिमाणानि, द्वित्व-पृथक्त्व-परत्वापरत्वानि, विनश्यदवस्थ-द्रव्यनिष्ठ-संयोग-विभाग-कर्माणि, अन्त्यः शब्दः, चरमसंस्कारो ज्ञानं च ग्राह्यम् इति व्याख्यातम्। श्रीधराचार्येण आदिशब्देन अष्टपदार्थानामुल्लेखः कृतः, किरणावलीकारेण च षोडशपदार्थानामिति विशेषः[९६]।

द्रव्याश्रितत्वञ्च अन्यत्र नित्यद्रव्येभ्यः इत्यस्य व्याख्याने न्यायकन्दल्यां यथा दृश्यते व्याख्यानं न तथा किरणावल्याम्। किरणावल्यां द्रव्याश्रितत्वम् इत्यस्य द्रव्यसमवायिकारणता इत्यर्थनिरूपणानन्तरं द्रव्यत्वादि-सामान्य-विशेषपदार्थयोरतिप्रसङ्गः प्राप्नोतीति निरूपितम्। ननु आश्रितत्वरूपं साधर्म्यं षण्णामेव इति पूर्वं निरूपितम्, इह पुनः कथनेन पौनरूक्त्यम् इति चेन्न द्रव्योपलक्षितस्य आश्रितत्वस्य ह्यत्र विवक्षणाद् इति केचित्, तच्च अयुक्तम्, द्रव्योपलक्षितस्य आश्रितत्वस्य सामान्यादीनाम् अपि सम्भवात् न इदं द्रव्यादित्रयस्य साधर्म्यकथनं भवेत्। अत्रोच्यते अन्यत्र हि नित्यद्रव्येभ्य

---

[९५] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-६१

[९६] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१४६

इति द्रव्यग्रहणं हि उपलक्षणम्, ये तावद् विशेषाः तद्वृत्तयः अन्त्याः ते अपि गृह्यन्ते। नित्यद्रव्याणि तन्निष्ठान् विशेषान् च परित्यज्य द्रव्ये एव आश्रिततत्त्वं द्रव्यादित्रयस्य साधर्म्यं न तु अपरेषाम्[९७]।

सामान्यविशेषसमवायानां साधर्म्यं स्वात्मसत्त्वम्। तद्व्याख्याने किरणावलीकारेण उदयनाचार्येण 'स्वात्मसत्त्वं सत्ताविरहः' इति व्याख्यातम्[९८]। श्रीधराचार्येण किन्तु इह विस्तरेण व्याख्यातम्। तथाहि तेन स्वात्मसत्त्वम् इत्यस्य स्वात्मैव सत्त्वं स्वात्मसत्त्वं स्वरूपं यत् सामान्यादीनां तदेव तेषां सत्त्वम्, न सत्तायोगः सत्त्वम् इति व्याख्यातम्। अतः सामान्यरहितत्वं हि सामान्यविशेषसमवायानां साधर्म्यम्। तथाहि न तावत् सत्तायां सत्ता बाधकसद्भावाद् अनिष्टप्रसङ्गात्। विशेषेषु च सामान्यसद्भावे संशयसम्भवस्तथा च अनवस्था। समवाये सत्ताङ्गीकारे च तद्वृत्त्यनुरोधेन समावायान्तरस्वीकाराद् अनिष्टापत्तिः। ननु कथं तर्हि सामान्यादिषु सत्सदिति प्रतीतिः? अत्रोच्यते स्वरूपसत्त्वसाधर्म्येण सत्ताध्यारोपात् तथा प्रत्ययः। भिन्नस्वभावेषु एकानुगमात् मिथ्याप्रत्ययः अयम्, स्वरूपग्रहणं किन्तु न मिथ्या, स्वरूपस्य यथार्थत्वात्।

ननु द्रव्यादिषु अपि प्रत्ययानुगमः सत्ताध्यारोपकृत एव अस्तु इति चेन्न, मुख्ये असति अध्यारोपासम्भवात्, सामान्यादिषु तु नेयं मुख्या, द्रव्यादिषु च

---

[९७] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-६२

[९८] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१४८

बाधकसम्भवात् तदभावः[99]। भाषापरिच्छेदे उक्तम् एतद्विषये – 'सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः[100]' इति।

सामान्यादीनां साधर्म्यं बुद्धिलक्षणत्वम्। एतद्व्याख्यानं कुर्वतोः उभयोर्हि टीकाकृतोः प्रायेण दृश्यते साम्मत्यम्, यद्यपि श्रीधराचार्येण किञ्चिदधिकतया आशङ्कोत्थापनेन च व्याख्यातम्। तथाहि बुद्धिलक्षणशब्दस्य व्युत्पादनं कुर्वता श्रीधराचार्येण उक्तं यद् बुद्धिरेव लक्षणं प्रमाणं येषां ते बुद्धिलक्षणाः इति। कथं च तावद् बुद्धिरेव प्रमाणम् इत्यत्रोच्यते विप्रतिपन्नं प्रति सामान्यादिसद्भावे बुद्धिरेव लक्षणं न तु अन्यत्, द्रव्यादिसद्भावे तु अन्यद् अपि भवति प्रमाणम्।

ननु बुद्ध्या लक्ष्यन्ते प्रतीयन्त इति बुद्धिलक्षणाः इति चेन्न, द्रव्यादेरपि स्वबुद्धिलक्षणत्वात् न वैधर्म्यम् उक्तं स्यात्[101]। किरणावलीकारेण तु केवलं बुद्धिलक्षणत्वं बुद्धिमात्रम् अमीषां लक्षणं प्रमाणम्। न तु द्रव्यादिवत्प्रमाणान्तरम् अस्ति। अनुवृत्तव्यावृत्तबुद्धिरिह इति बुद्धिरित्येव सामान्यादित्रये प्रमाणम् इति व्याख्यातम्[102]।

सामान्यविशेषसमवायानाम् अकार्यत्वरूपसाधर्म्यव्याख्यानं कुर्वता श्रीधराचार्येण कारणानपेक्षस्वभावत्वम् इत्युक्तम्। किरणावलीकारेण च

---

[99] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-६२

[100] भा.प., सम्पा. पञ्चानन भट्टाचार्य, कारिका–१५

[101] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-६४

[102] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१४८

अकार्यत्वम् इत्यस्य अनादित्वम् इत्यर्थः कृतः। उभयोरेव अत्र मातसाम्मत्यम् इत्येव मन्ये।

यदुक्तं किरणावलीकारेण अनादित्वम् इति, तदर्थस्तु अविद्यमान आदिर्यस्य तद् अनादि, तत्त्वम अनादित्वम्। आदिश्च नूनं कारणापेक्षी, न च यस्य आदिरस्ति तस्य कारणापेक्षापि नास्ति इति कारणानपेक्षत्वमिति उभयोरत्र मतयोरस्ति समानता इति भाति। तत्परं तु सामान्यगततदकार्यत्वस्य कथं ग्रहणं भवति इति विचारेण श्रीधराचार्येण, किरणावलीकारेण तु तद्विषये किमपि नालोचितम्, तेन कथं तस्य अनादित्वं सम्भवति इत्येव निरूपितम्।

अत्रापरं वाच्यं यत् श्रीधराचार्येण सामान्यस्य अकार्यत्वसाधर्म्यालोचनानन्तरं समवायस्य साधर्म्यालोचनं कृतं ततश्च विशेषस्य, यच्च उद्देशक्रमविरोधि, किरणावलीकारेण तु यथाक्रमम् एव आलोचितम्। अतः किरणावलीकारक्रमः अत्र अनुस्रियते – श्रीधराचार्येण विशेषाणाम् अकार्यत्वं साधितं वस्तुत्वेन द्रव्यगुणकर्मान्यत्वात् सामान्यसमवायवदित्येव। किरणावलीकारेण किन्तु विशेषाणामनित्यत्वे द्रव्याणामिविशिष्टत्वेन स्वभावसाङ्कर्यापत्त्या स्वभावपरावृत्तिप्रसङ्गेन सर्वदा हि विशिष्टानि द्रव्याणि इति विशेषा नित्या इत्येवं तेषाम् अकार्यत्वं साधितम्। पटः अपि अकार्यः। पूर्वापरसभावाप्राप्तेः अकार्यः, तथाहि यदि पटसमवायः पटात्पूर्वं चेत् सम्बन्धिनः असत्त्वात् असम्भवः स सम्बन्धः,

पटसहभावीति चेत् पटानाधारः, पटपरभावित्वे अपि स एव दोषः, अयुक्तं च कार्यस्य अनाधारत्वम्। अतः अकार्य एव समवाय इति श्रीधराचार्यः[१०३]।

किरणावलीकारास्तु आहुः समवायः कथं जायेत? यदि समवायान्तरेण तदा अनवस्था। अतो यदि समवायिकारणं विना तदा कार्यान्तरमर्यादातिक्रमी भवति, कथञ्च विनाशावकाशः समवायिकारणाभावात्? अविनाशिनः कथम् एव वा उत्पत्तिः? अविनाशिनो भावस्य अनुत्पत्तेः। तस्माद् अकार्य एव समवायः।[१०४] अकार्यत्वपदव्याख्याने व्योमशिवाचार्येण तु एवं व्याख्यातम् – 'कार्याणामभावः अकार्यत्वं स्वकारणसत्तासम्बन्धाभावः' इति।

अकारणत्वरूपसाधर्म्यव्याख्याने न्याकन्दल्यां श्रीधराचार्येण समवाय्यसमवायिकारणत्वाभावः, बुद्धिनिमित्तत्वाभ्युपगमात् निमित्तकारणत्वप्रतिषेधस्तु न इति व्याख्यातम्। किरणावलीकारेण किन्तु तत्पदस्य किमपि व्याख्यानं न कृतम्, केवलम् अनात्मधर्मापेक्षया इति निरूपितम्। अत्रेदं निरूप्यं व्योमशिवाचार्येण अपि समवाय्यसमवायिकारणत्वाभाव एव अकारणत्वमिति व्याख्यातम्। तदुक्तम् – 'तथा कारणानामभावः अकारणत्वं समवाय्यसमवायिकारणत्वाभावः। निमित्तकारणत्वञ्च ज्ञानोत्पत्ताविष्यत एव।' इति।

---

[१०३]न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-६५

[१०४] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१५३

असामान्यविशेषवत्त्वम् इत्यस्य व्याख्याने उभयोः टीकाकृतोः दृश्यते स्वरसः अपरजातिरहितत्वम् इति अपरसामान्यविरह इति च। अपरसामान्यविरहकारणं च उभाभ्यामेव अनवस्था इत्येव प्रदर्शितम्। ननु कथं तर्हि सामन्यं सामान्यमिति अनुगतप्रतीतिरिति शङ्कासमाधानं तु श्रीधराचार्यव्याख्यायां दृश्यते। उच्यते यथा हि एकं तावत् सामान्यम् अनेकव्यक्तिवृत्ति तथा अन्यद् अपि इति अनेकव्यक्तिवृत्तिरूपोपाध्याश्रयेण हि तादृशशब्दप्रयोगः। किरणावल्यामेतद्विषये न वर्त्तते व्याख्यानम्।

नित्यत्वं सामान्यादित्रयाणां साधर्म्यम्। नित्यत्वं विनाशरहितत्वम् इति न्यायकन्दल्याम्। किरणावल्यां किन्तु अकार्यत्वम् अनन्तत्वम् इति प्रतिपादितम्। वस्तुतः अनन्तत्वमिति नेह असंख्यत्वमिति विवक्षितम्, किन्तु विनाशरहितत्वम् इत्यर्थः। अतः प्रकाशटीकायाम् उक्तम् - अनन्तत्वं ध्वंसाप्रतियोगित्वम् इति। अर्थशब्दानभिधेयत्वमिति पदस्य व्याख्यानम् उभयोः ससं दृश्यते स्वसमयार्थशब्दानभिधेयत्वम् इति। 'सामान्यादीनां त्रयाणां स्वात्मसत्त्वं बुद्धिलक्षणत्वमकार्यत्वमकारणत्वमसामान्यविशेषवत्त्वं नित्यत्वमर्थशब्दानभिधेयत्वं चेति[१०५]' इति प्रशस्तपादभाष्यस्य चेति पदव्याख्याने श्रीधराचार्येण समुच्चय इति अर्थो निरूपितः[१०६]।

---

[१०५] प्र.पा.भा., सम्पा. जयकृष्णदासः

[१०६] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-६७

उदयनाचार्येण तु चकारात् कारणानपेक्षत्वम् इति बोध्यम् इति व्याख्यातम्। तच्च उपलक्षणभूतम्, अन्यस्यापि ऊहनीयत्वात्। तथाहि तेन अन्यसाधर्म्याणि अपि व्याहृतानि – अनित्यधर्मत्वम् अविशेषाणाम् एव, नित्यत्वम् अकर्मणाम् एव, अयोगिप्रत्यक्षत्वं द्रव्यादीनां चतुर्णाम् एव, असमवायिकारणत्वं गुणकर्मणोः एव, असमवेतत्वं नित्यद्रव्यसमवाययोः एव इति चकारपरामृष्टकारणानपेक्षत्वोपलक्षितानि साधर्म्याणि एतानि बोध्यानि[१०७]।

'पृथिव्यादीनां नवानामपि द्रव्यत्वयोगः स्वात्मन्यारम्भकत्वं गुणवत्त्वं कार्यकारणविरोधित्वमन्त्यविशेषवत्त्वम्' इति वचनेन पृथिव्यादीनां साधर्म्यं व्याख्यातं प्रशस्तपादेन। तद्व्याख्यानगतपदानां सम्प्रति आलोचनं विधीयते।

द्रव्यत्वयोगः पृथिव्यादीनां साधर्म्यम्। द्रव्यत्वयोगश्च द्रव्यत्वेन सामान्येन योगः सम्बन्ध इति श्रीधराचार्यः। उदयनाचार्येण तु इह द्रव्यसमवाय इत्युक्तम्। यद्यपि नात्र अर्थभेदो जायते, तथापि दृश्यते श्रीधराचार्येण सविश्लेषणम् अर्थो निरूपितः, सम्बन्धनाम च नोल्लिखितम्। उदयनाचार्येण च विश्लेषणं न विहितम्, नाम्ना च सम्बन्ध उल्लिखितः। भाष्यस्य 'नवानाम् अपि' इति अपिपदस्य उभाभ्यामेव अभिव्याप्त्यर्थो निरूपितः।

---

[१०७] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१५३

श्रीधराचार्येण उदयनाचार्येण च द्वाभ्याम् एव अत्र विषये शङ्काः काश्चन विचारिताः। तथाहि श्रीधराचार्येण वर्णितः पक्ष ईदृशः - कश्चनाह द्रव्यत्वयोगो हि द्रव्यत्वसमवायः, पञ्चपदार्थधर्मत्वात् स कथं द्रव्यलक्षणम्। अन्यश्च कश्चन एवं समाधत्ते यद्यपि समवायस्य सर्वत्रैव अभिन्नत्वम्, तथापि इह तु द्रव्यलक्षणं द्रव्यत्वोपलक्षणभेदात्, यथा अभिन्नस्याप्याकाशस्य कल्पितभेदस्य श्रोत्रभावेनार्थक्रिया-भेदस्तथात्रापि ध्येयम्। एतद्द्वयमेव असाधु इति श्रीधराचार्यः, न खलु यथा आकाशं भवति श्रोत्रं तथा नात्र योगो हि द्रव्यस्य लक्षणम्, किन्तु द्रव्यम्। योगसङ्कीर्त्तनं तु लिङ्गस्य धर्मिण्यस्तित्वकथनम्, तत्त्वसम्बद्धस्य अलक्षणत्वादिति विचारः[१०८]।

उदयनाचार्यश्चाह द्रव्यत्वमात्रकथनेनैव सिद्धौ योगग्रहणम् उपलक्षणनियमार्थम्। सामान्यसमवाययोः अपरिच्छिन्नदेशत्वात् कथं तावद् अत्रैवेदं नान्यत्रेति प्रत्यय इति केचिदाशङ्कन्ते, अत्रोच्यते यत इदं द्रव्यत्वम् अत्रैव वर्तते नान्यत्र इति। द्रव्यत्वस्य अयमेव स्वभावो यद् एताभिः व्यक्तिभिः सहैव समवायम् अभिव्यञ्जयेत् न तु रूपादिभिर्व्यक्तिभिः। एवञ्च गुत्वत्वं रूपादिभिर्व्यक्तिभिः समवायम् अभिव्यञ्जयेत् न पृथिव्यादिभिर्व्यक्तिभिः।

ननु नास्ति तावद् द्रव्यत्वम् एव गोत्वादिवद् अनुपलब्धेः इति चेन्न, कार्याश्रयत्वोपलक्षणेन साधर्म्येण अभिव्यक्तस्य सामान्यस्य

---

[१०८] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-६८

सास्नादिसंस्थानाभिव्यक्तगोत्ववदेव प्रतीतेः। अन्यथा च सामान्यनियतं कार्याश्रयत्वम् अपि नवसु अपि न स्यात्। उक्तश्चायमत्र विशेषः –

व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।

रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः।।[१०९] इति।

स्वात्मन्यारम्भकत्वम् इत्यस्य श्रीधराचार्येण स्वसमवेतकार्यजनकत्वम् इत्यर्थः कृतः। किन्तु किरणावलीकारेण तस्य स्वसमवेतकार्यत्वं तदर्थश्च समवायिकारणत्वमम् इति निरूपितम्। गुणवत्त्वम् इति खलु गुणैः सम्बन्ध इति न्यायकन्दल्याम्। किरणावल्याञ्च स सम्बन्धः क इत्यपि नामग्राहं प्रतिपादितम्, गुणसमवाय इति। स्वात्मन्यारम्भकत्वं गुणवत्त्वञ्च इति एतद्द्वयं द्रव्याणां गुणादिभ्यो वैधर्म्यम् इति श्रीधराचार्यः[११०]। उदयनाचार्यमते तु एतद्द्वयं निमित्तव्यवस्थापकद्रव्यत्वं तच्च द्रव्यव्यवहारनिमित्तम्[१११] इति उभयोः भेदः।

कार्यकारणाविरोधित्वम् इति कार्यकारणयोः अन्यतरेण अपि न हि द्रव्यजातीयं किञ्चित् न विरुध्यते इति किरणावलीकारः। श्रीधराचार्येण त्वत्र वैशद्येन व्याख्यातम्। तथाहि कार्येण क्वचित्तु गुणो विनाश्यते, यथा आदिमः शब्देन द्वितीयशब्देन। क्वचिच्च कारणेन कार्यं विनाश्यते, यथा

[१०९] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१५३

[११०] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-६८

[१११] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१५३

उपान्त्यशब्देन अन्त्यः शब्दः। किन्तु द्रव्याणि न हि स्वकार्येण नापि स्वकारणेन विनाश्यन्ते, अतः कार्यकारणाविरोधीनि। नित्यद्रव्याणां तु कारणस्य विनाशस्य च अभावादेव कारणेनाविनाशः, अनित्यद्रव्याणां तु कारणविनाशसम्भवे अपि न कारणेन विनाशः, किन्तु अपरेण[११२]।

अवयविद्रव्यातिरिक्तानां साधर्म्यम् उक्तं प्रशस्तपादभाष्ये अनाश्रिततत्वम् अनित्यत्वं च। अनाश्रिततत्वम् इति श्रीधराचार्यमते असमवेततत्वम्[११३]। किरणावलीकारास्त्वाहुः अनाश्रिततत्वम् इति आधारैकस्वभावता इति। 'चान्यत्रावयविद्रव्येभ्यः' इत्यस्य चकारस्य तात्पर्यं तु श्रीधराचार्येण न प्रदर्शितम्। उदयनाचार्येणोक्तं चकाराद् विपर्ययेण विशेषरहितद्रव्यत्वम् इति बोध्यम्[११४]।

प्रशस्तपादेन क्षित्यप्तेजोमरुदात्ममनसां साधर्म्यम् उक्तम् अनेकत्वम् अपरजातिमत्त्वं च। तत्र अनेकत्वपदव्याख्याने श्रीधराचार्यण प्रत्येकं व्यक्तिभेद इति व्याख्यातम्। किरणावल्यां केवलम् अनेकत्वं बहुत्वसंख्या इत्युक्तम्। अपरजातिमत्त्वमिति च पृथिवीत्वादिजातिसम्बन्धित्वम् इति श्रीधराचार्यः[११५]। अपरा जातिः पृथिवीत्वादिका, तद्वत्ता तत्समवाय इति आचार्योदयनः[११६]।

---

[११२] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-६८
[११३] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-६९
[११४] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१६४
[११५] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-६९
[११६] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१६६

अत्रापि पूर्ववत् श्रीधराचार्येण सम्बन्धमात्रम् उल्लिखितम्, उदयनाचार्येण च नामग्राहं सम्बन्ध उल्लिखित इति उभयोर्भेदः।

क्षित्यप्तेजोमरुन्मसां क्रियावत्त्वं मूर्त्तत्वं परत्वम् अपरत्वं वेगवत्त्वं च साधर्म्यम् इति। क्रियावत्त्वम् इति उत्क्षेपणादिक्रियायोगवत्त्वम्। मूर्त्तत्वं च अवच्छिन्नपरिणाणयोगित्वम्। परत्वापरत्ववेगवत्त्वानि च वस्तुतः परत्वापरत्ववेगानां समवाय इति न्यायकन्दलीमतम्। किरणावल्यां क्रिया इति स्पन्दः, तद्वत्ता च क्रियावत्त्वम्। मूर्त्तत्वं तु असर्वगतपरिमाणयोगः। परत्वापरत्वे इति गुणविशेषौ इत्येव न्यरूपि। वेगः संस्कारविशेषः, तद्वत्त्वमिति नात्रापि उभयोः तावत् मतवैभिन्न्यम्।

अत्र तु उल्लेख्यं श्रीधराचार्येण परत्वापरत्वविषये एवं विचारितं विशेषेण – केचित् तावद् आहुः परत्वापरत्वे तु न स्तः संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वयोः परापरव्यवहारहेतुत्वात्। श्रीधराचार्यमते एतन्मतम् असत्, तथाहि परापरप्रत्ययानुरोधेन हि परत्वापरत्वाङ्गीकारः। भिन्नदिक्सम्बन्धिनोः संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वे सति अपि शरीर-सापेक्ष-सन्निकृष्ट-विप्रकृष्ट-बुद्ध्युत्पादे च सत्यपि न खलु परत्वापरत्वप्रत्ययोत्पत्तिः। किञ्चिद्दिगवस्थित-पिण्डयोः तादृशः प्रत्यय इति

चेत् नूनं तर्हि संयोगस्य अल्पीयस्त्वभूयस्त्वाभ्यां विषयान्तरम्, किञ्च विलक्षणाया बुद्धेः विषय-वैलक्षण्यम् अन्तरेण अनुत्पादात्[११७]।

वेग-विषये अपि मतविशेष एवम् उपस्थापितः कन्दलीकृता – श्लथगतौ वेगप्रतीत्यभावात् न खलु वेगः केवलक्रियासन्ततिमात्रम्, किन्तु गुणान्तरम् एव। क्रियावेगयोः भेदावगतिः प्रत्यक्षसिद्धा, वेगेन यातीति प्रतीतेः वेगप्रत्ययस्य भावात्।[११८]

आकाशकालदिगात्मनां सर्वगतत्वम् इत्यस्य व्याख्याने कन्दलीकारेण उक्तं सर्वशब्देन मूर्त्तद्रव्याणि गृह्यन्ते, तानि च प्रकृतापेक्षया अनन्तरोक्तानि। सर्वगतत्वम् इत्यस्य अर्थश्च आकाशादीनां सर्वमूर्तैः सह संयोगः, तेषां निष्क्रियत्वात् नात्र गम्-धातोः चलनरूपः अर्थो ग्राह्यः।

परममहत्त्वम् इत्यस्य अर्थः न्यायकन्दल्याम् इयत्तानवच्छिन्न-परिमाण-योगित्वम् इति। प्रकर्षकाष्ठाप्राप्तमहत्परिमाणयोगः इति किरणावलीकारमतम्। श्रीधराचार्यकृतव्याख्यानस्य तात्पर्यं किरणावलीकारेण प्रकाशितम् इव दृश्यते – तथाहि इयत्ता परिमाणम् इति चेत् तदा संख्यागुरुत्वयोः अप तत्परिमाणप्रसङ्गः। परमाणुषु च हस्तवितस्त्यादिपरिकल्पनाभावात् तदभावप्रसङ्गपातः। ननु परमसूक्ष्मत्वात् तदभावे परमाणुः अपि परिमित इति

---

[११७] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-७०

[११८] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-७०

चेन्न, तदभावे अपि परममहत्त्वाद् आकाशादि परिमितम् एव स्याद् इति न कश्चन विशेषो भवेत्। अत उच्यते हस्तवितस्त्यादिप्रकर्षनिकर्षविशिष्टः अन्येभ्यो व्यावृत्तः परस्परम् अनुवृत्तश्च गुणविशेषः प्रत्यक्षसिद्धस्तथा दुरुपह्नवः। तत्र निकर्षकाष्ठया यथा परमाणुत्वं तथा परममहत्त्वम् अपि प्रकर्षकाष्ठया इति बोध्यम्[११९]।

सर्वसंयोगिसमानदेशत्वस्य अर्थः सर्वेषां संयोगिनां मूर्त्तद्रव्याणाम् आकाशः समानो देश एक आधार इति उभाभ्याम् एव टीकाकृद्भ्यां समान एव निरूपितः, विशेषस्तु अयम् उदयनाचार्येण आकाशादयः केन सम्बन्धेन आधार इति प्रतिपादितं संयोगसम्बन्धेन इति। अत्र श्रीधराचार्येण प्रशस्तपादभाष्यस्य दोषशङ्कैका एवं खण्डिता – सर्वसंयोगिनाम् आधार आकाशादिकं यद्यपि न भवति आधाररूपेण अवस्थानात् तथापि उपचारेण सर्वसंयोगाधारत्वात् सर्वसंयोगिनाम् आधार इत्युक्तम्। अत एव सर्वगतम् इति भाष्यकारवचनस्य न पौनरुक्त्यम्, तत्र सर्वैः सह संयोगस्य उक्तत्वात्, इह च आधारवचनात्।

किरणावलीकारस्तु इह एवं व्याख्यायति – यत् पूर्वं सर्वमूर्त्तेषु आकाशादय एव वर्त्तन्ते इति कथनाद् अत्र च आकाशादिषु ते एव भावा

[११९] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१६७

वर्तन्ते इति व्याख्यानात् न भवति पौनरुक्त्यम्[१२०]। श्रीधराचार्यमतम् अपि उदयनाचार्येण पक्षान्तरतया उल्लिखितम्, मूर्त्तसंयोगा एव पूर्वम् आकाशादौ तिष्ठन्ति इति उक्तम् इह च मूर्त्ता एव आकाशादिषु सन्ति न तु मूर्त्तसंयोगा इति कथनात् पौनरुक्त्याभावः[१२१]।

पृथिव्यादीनाम् आकाशान्ताम् इतरवैधर्म्येण साधर्म्यम् उक्तं प्रशस्तपादभाष्येण – 'पृथिव्यादीनां पञ्चानाम् अपि भूतत्वेन्द्रिय-प्रकृतित्व-बाह्यैकैकेन्द्रियग्राह्य-विशेषगुणवत्त्वानि' इति। अस्य भूतत्वविषये व्याख्यानं श्रीधराचार्यकृतम् एवं यत् पृथिव्यादिषु अनेकेषु एकशब्दप्रवृत्तिः एकनिमित्तम् अन्तरेण भवति अक्षशब्दवत्, यथा अक्षशब्दः देवनत्वेन्द्रियत्वबिभीतकत्वसामान्यत्रययोगेन देवनादिषु साङ्केतिकः तथा चतुर्षु पृथिव्यादिषु पृथिवीत्वादिसामान्यवशाद् भूतशब्दसङ्केतः। ननु आकाशे कथं तर्हि प्रत्ययः? अत्रोच्यते भूतं भूतम् इति व्यक्तिनिमत्त एव तादृशशब्दानुविद्धः प्रत्ययः तच्छब्दवाच्यतोपाधिकृत एव[१२२]।

श्रीमदुदयनाचार्येण तु अत्र विषये विचारविशेष उपस्थापितः, तथाहि भूतत्वं नाम सामान्यम् औपाधिकम्। ननु कथं तावत् न तत् जातिः स्यात्? अत्रोच्यते व्यञ्जकनियमाभावात् व्यक्तिनियमस्य अनुपपत्तेः एव जातिर्न

---

[१२०] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-७१

[१२१] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१६८

[१२२] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-७२

स्यात्। अत्र केचिद् आहुः बहिरिन्द्रियग्राह्यगुणवत्ता हि तद्व्यञ्जिका इति। तन्न, अवच्छिन्न-परिमाण-रूप-व्यञ्जक-सद्भावात् मूर्त्तत्वस्य अपि जातित्वापत्तेः। किन्तु जातित्वं न हि तस्य सम्भवति साङ्कर्यात्। तथाहि मनसि मूर्त्तत्वस्य नभसि च भूतत्वस्य अन्योन्यपरिहारेण वर्त्तमानस्य क्षित्यादौ सङ्करः। ननु पृथिवीत्वाद्यनेकनिबन्धनप्रवृत्तिक एव भूतशब्दः अक्षादिवद् इति चेन्न, अनेकार्थत्वकल्पनस्य अनवकाशो यदि एकनिमित्तत्वं सम्भवति। अतो हि भोक्तव्यस्य आश्रयतया सिद्धभूतानि प्रसिद्धानि भूतानि इति उच्यन्ते[१२३]।

इन्द्रियप्रकृतित्वम् इत्यस्य अर्थ इन्द्रियोपादानकारणत्वम् इति[१२४] किरणावलीकाराः। श्रीधराचार्येण किन्तु इन्द्रियस्वभावत्वम्[१२५] इति कृतः अर्थः। अत एव व्याख्यानभेदः अपि। किरणावलीकारेण उक्तम् इन्द्रियकारणत्वं हि आकाशस्य अवच्छिन्नत्वेन अनवच्छिन्नत्वेन च भेदकल्पनया उपपाद्यम्। इन्द्रियोपादानकारणत्व-रूपार्थाङ्गीकारेण तात्पर्यं विवृतम् – उपादानकारणं हि समवायिकारणम्, इन्द्रियाणाम् उपादानकारणत्वे श्रोत्रस्यापि इन्द्रियत्वात् तस्यापि उपादानकारणताप्रसङ्गः, किन्तु श्रोत्रस्य आकाशरूपत्वाद् आकाशस्य च विभुत्वात् नित्यत्वाच्च कथं श्रवणेन्द्रियत्वं

---

[१२३] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१६९

[१२४] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१७०

[१२५] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-७२

सम्भवति। अत्रोच्यते आकाशस्य इन्द्रियप्रकृतित्वोपपादनम् आकाशस्य अवच्छिन्नानवच्छिन्नत्वेन भेदनकल्पनया शक्यसम्भवम्।

कर्णशष्कुल्यवच्छिन्नाकाशस्य हि श्रवणेन्द्रियत्वं कल्प्यते, अवच्छिन्नाकाश-कर्ण-शष्कुल्यवच्छिन्नाकाशयोः भेंद-कल्पनम् ऋते शब्दस्य श्रवणेन्द्रियरूपाकाश-ग्राह्यत्वं न कथमपि सम्भवेत्। अनवच्छिन्नाकाशेन शब्दग्रहणासम्भवात् कर्णशष्कुल्यवच्छिन्नाकाशेन च तत्सम्भावत् तादृशावच्छिन्नाकाशस्य प्रकृतिसिद्ध्यनुरोधेन शुद्धाकाशस्य अनवच्छिन्नत्वेन अवच्छिन्नत्वेन च भेदस्य कल्पनं क्रियते। अनवच्छिन्नस्य आकाशस्य नित्यत्वे अपि शष्कुल्यवच्छिन्नस्याकाशस्य भवत्युपादानकारणम् अवच्छिन्नत्वेन अनवच्छिन्नात् तस्य भेदात् जन्यत्वाच्च।

अत्र तु गौरीनाथशास्त्रिणा विचारितं तु किञ्चित् प्रस्तूयते – वैशेषिकसूत्रकारेण शब्दस्य द्रव्यत्वनिषेधाय 'एकद्रव्यत्वान्न द्रव्यम्[१२६]' इति कृतं सूत्रम्। तेन हि जन्यद्रव्यस्य एकद्रव्यत्वं निषिद्ध्यते। केवलैकद्रव्यस्य समवायिकारणत्वेन शब्दस्य द्रव्यत्वस्य कणादेन अनिष्टत्वे श्रवणेन्द्रियस्यापि अनवच्छिन्नाकाशाद् एकमात्रात् समवायिकारणाद् उत्पन्नत्वेन कथं द्रव्यत्वम्? श्रवणेन्द्रियस्य अद्रव्यत्वे च इन्द्रियत्वम् अपि तस्य भवति

[१२६] वै.सू. - २.२.२३

निषिद्धम्। व्योमवत्याम् अपि उक्तम् – ‘कर्णशष्कुल्याकाश-संयोगोपलक्षितस्य आकाशस्य कार्यत्वात् तदपेक्षया आकाशस्य कारणत्वात्।’ इति। व्योमवतीकारेण अत एव श्रवणेन्द्रियस्य द्रव्यत्वसिद्ध्यसम्भवात् प्रकृतिशब्दः स्वभावार्थो गृहीतः।

व्योमवतीकारेण श्रोत्रवर्णनकाले ‘कर्ण-शष्कुल्याकाश-संयोगोपलक्षित-विशिष्टादृष्टोपगृहीतनभोदश’ एव श्रवणेन्द्रियतया उक्तः। परं श्रवणेन्द्रियस्य जन्यत्वं स्पष्टतया न निरूपितम्। एतच्च वाच्यं यद् उदयनाचार्येण व्यख्याने स्वतन्त्रेति नाम्ना अभिहिते वैशेषिकसूत्रे इन्द्रियप्रकृतित्वं साक्षात् मनसो वैधर्म्यम् इति नोक्तम्। न च प्रशस्तपादभाष्यस्य केनचिद् अन्येन टीकाकृता वैधर्म्यम् इदम् उल्लिखितम्।

ईदृशशङ्का-हेतोः एव किरणावलीकारेण प्रकृतिशब्दस्य स्वभावार्थत्वं प्रदर्शितम्। इन्द्रियप्रकृतित्वस्य इन्द्रियस्वभावत्वे अर्थे पृथिव्यादीनि पञ्च द्रव्याणि एव ज्ञानकरणरूपाणि भवेयुः। तदा तर्हि घटपटादिपार्थिव्द्रव्येषु तत्साधर्म्यस्य अव्याप्तिः। घटपटादयो हि विषयतया ज्ञानकारणानि भवन्ति, किन्तु पार्थिववस्त्वन्तरज्ञानं प्रति न तेषां कथमपि करणत्वम्। अतो न हि तादृशार्थसम्भवः।

इन्द्रियतादात्म्यस्य एव इन्द्रियस्वभावत्वे घ्राणेन्द्रियरूपपार्थिववस्तुनि सत्यपि इन्द्रियस्वभावत्वे घटपटादिषु तदभावाद् अव्याप्तिः। अतो हि इन्द्रिय-

स्वभावताया बहिरिन्द्रिय-वृत्ति-द्रव्य-विभाजकोपाधिरेव अर्थो ग्राह्यः। बहिरिन्द्रियम् अपि पृथिवीत्वजलत्वाद्युपहितं भवति। घटपटादीनाम् अपि तद्द्रव्यविभाजकोपहितत्वात् नाव्याप्तिः[१२७]। एतच्च सर्वं गौरीनाथशास्त्रिमहाभागेन वैशद्येन प्रपञ्चितम्।

श्रीधराचार्येण तु इन्द्रियस्वभावत्वम् इत्यर्थाङ्गीकारेण एव कथम् अर्थो निरूपित इति पर्यवेक्ष्यम्। केचिद् आहुः भूतस्वभावानि इन्द्रियाणि न अप्राप्यकारित्वात्, प्रदीपस्य इव प्राप्यकारित्वं खलु भौतिको धर्मः। तन्न, व्यवहिते अर्थे सति अनुपलब्धिः भवति, यदि च अप्राप्यकारि भवति इन्द्रियं तदा कुड्यादिव्यवहितम् अपि अर्थं इन्द्रियं गृह्णीयात्, प्राप्तेः तत्र अविशेषात्। ननु व्यवहितार्थस्य अग्रहणं तत्र योग्यताभावाद् इति चेन्न, तदानीम् एव अव्यवहितार्थग्रहणाद् इन्द्रियस्य विषयग्रहणसामर्थ्य-रूप-योग्यता तु अस्ति एव, विषयस्य अपि या योग्यता महत्त्वानेकद्रव्यवत्त्वरूपविशेषाद्यात्मिका सा खलु अस्ति एव, आर्जवावस्थानम् अपि तत्र वर्त्तते, अतो व्यवहितार्थत्वाद् एव अनुपलब्धिः।

केचिदत्र ब्रुवन्ति – यथा पतनकर्मणि संयोगाभावः कारणं तथा आवरणाभावः अपि अर्थप्रतीतिकारणम् इति, अतो हि सति आवरणे हि निवृत्तम् आवरणम् इति प्रतीतेः तत्र अर्थोपलब्ध्यनुत्पत्तिः कारणावभावाद्

---

[१२७] कि.व., सम्पा. गौरीनाथ शास्त्री, पृ-३६०

इति। तदसत्, स्पर्शवद्द्रव्यप्राप्तिप्रतिषेधार्थत्वेन आवरणस्य उपलब्धत्वात्। छत्रादिकं खलु पततो वारिणः तथा आतपतेजसः प्राप्तिं प्रतिषेधति, न खलु स्वाभावमात्रं साधयति। एवं तर्हि इदं खलु शक्यानुमानम् – प्राप्तप्रकाशकं चक्षुः व्यवहितार्थप्रकाशकत्वात् प्रदीपवत्, बाह्येन्द्रियत्वाद् वा त्वगिन्द्रियवत्[१२८]।

'चतुर्णां द्रव्यारम्भकत्वस्पर्शवत्त्वे' इति भाष्यस्य व्याख्याने न्यायकन्दलीकारेण चतुर्णाम् इति पृथिव्युदकानलानिलानाम् इति व्याख्यातम्। द्रव्यारम्भकत्वं च द्रव्यनिरूपित-समवायिकारणतावत्त्वम्। तद् वस्तुतो निजा शक्तिः एव। स्पर्शवत्त्वं हि स्पर्शसमवायः[१२९]। किरणावलीकारेण तु केवलं पदान्तरेण समम् एव तात्पर्यं विवृतम्। चतुर्णाम् इति पृथिव्यप्तेजोवायूनाम्, द्रव्यारम्भकत्वं च द्रव्यसमवायिकारणत्वम्। स्पर्शवत्त्वम् इत्यस्य च समम् एव व्याख्यानं विहितम्। किन्तु परम् उक्तं यत् प्रकृतवाक्यम् उपलक्षणम्। तेन अवान्तराणुत्वमहत्त्वे स्थितस्थापकसंस्कारयोगः शरीरारम्भकत्वं चेति द्रष्टव्यम्[१३०]।

---

[१२८] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-७४

[१२९] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-७६

[१३०] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१७३

साधर्म्यनिरूपणानन्तरं वैधर्म्यनिरूपणावसरे 'इहैदानीमेकैकशो वैधर्म्यमुच्यते[१३१]' इत्यस्य व्याख्यानं न्यायकन्दल्याम् एवं कृतम् – परस्परापेक्षया पूर्वं हि वैधर्म्यं निरूपितम्। अत्र तु वक्ष्यमाणप्रकरणे एकैकस्य धर्मस्य व्यावर्तको धर्म उच्यते। एकैकश इत्यत्र शस्प्रत्ययान्तपदेन वीप्सात्यन्तबहुव्याप्तिः प्रदर्श्यते[१३२]। किरणावलीकारेण तु एवं व्याख्यातं यत् पूर्वकृतसाधर्म्यवैधर्म्याभ्याम् अपि न कृतकृत्यत्वम्, अतः इह प्रकरणे अवसरप्राप्तौ, एकैकम् इत्यनेन एव चरितार्थत्वे अपि शस्प्रत्ययोपादनां वीप्सायां भूयस्त्वज्ञापनार्थम् इति।

पृथिव्या नित्यानित्यत्वभेदप्रसङ्गे परमाणुलक्षणा नित्या[१३३] इत्यस्य व्याख्याने न्यायकन्दल्यां यत् परमाणुस्वभावायाः पृथिव्याः सत्त्वे किं तावत् प्रमाणम्? अत्रोच्यते अनुमानम्। एवंक्रमेण तत्र त्रसरेणुसिद्धिस्ततो द्व्यणुकसिद्धिश्च दृश्यते। एतत्समा एव प्रक्रिया किरणावल्याम् अपि दृश्यते, विशेषस्तु तत्र वैशद्यं सूक्ष्मत्वञ्च।

परमाणुरूप-पृथिव्याः सद्भावे न्यायकन्दलीकारेण एवम् उक्तं यत् तत्र अनुमानम् एव प्रमाणम्, अणुपरिमाणतारतम्यं तु नूनं क्वचिद् विश्रान्तिं लभते परिमाणतारतम्यत्वाद् महत्परिमाणतारतम्यवत्, यत्रेदं विश्रान्तं यतः

---

[१३१] प्र.पा.भा., सम्पा. जयकृष्णदासः, पृ - १०

[१३२] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-८४

[१३३] प्र.पा.भा., सम्पा. जयकृष्णदासः, पृ -१२

परमाणुर्नास्ति सः परमाणुः इति[१३४]। उदयनाचार्येण अत्र प्रतिपादितं यत् नात्र किञ्चित् प्रमाणान्तरगवेषणया, त्रसरेणोः प्रत्यक्षसिद्धत्वात्। तस्य चावयवकल्पने प्रमाणाभावात् तस्य निरवयवत्वम्। एतदपि असन्मतम्, यदि तस्य अनेकद्रव्यवत्त्वं न स्यात् तदा महत्त्वम् अपि न स्यात्, तस्मात् स त्रसरेणुः अनेकद्रव्यसमवेतः अस्मच्चक्षुर्ग्राह्यत्वात्, घटादिवत्। त्रसरेणोर्हि अनेकैरवयवैर्भाव्यम्, महत्त्वं प्रति हि अनेकद्रव्यस्य कारणत्वम्। तस्मात् त्रसरेणोः अवयवाः सावयवाः महद्द्रव्यारम्भकत्वात्, तन्तुवत्। ते अपि सावयवाः इत्यतो विभज्यन्ते, घटवत्। तेषाम् अपि अवयवकल्पनं तु न भवति, प्रमाणाभावाद् बाधकाभावाच्च[१३५]।

पार्थिवेन्द्रियव्याख्यानवेलायां किरणावलीकारेण व्याख्यातं 'जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं घ्राणम्। जलादिभिरनभिभूतैरप्रतिहतसामर्थ्यैरवयवैरदृष्टवशादितवलिक्षणमारब्धमेतत्, अतो विशिष्टोत्पादादिदमेव गन्धाभिव्यक्तिसामर्थ्यम्, नान्यद् इत्यर्थः[१३६]' इति। किरणावलीकारेण पार्थिवेन्द्रियस्य घ्राणस्य जलाद्यनभिभूतावयवारब्धत्वं विवृण्वता उक्तं यत् तथा स्वभावाद् एव श्लेष्माद्यभिभवे गन्धो न गृह्यते[१३७]।

---

[१३४] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-९४
[१३५] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-२२७
[१३६] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-१०४
[१३७] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-२५५

पार्थिवविषयव्याख्यानकाले न्यायकन्दलीकृता द्व्यणुकसिद्धिविषये तु न विहितो यत्नः, उदयनाचार्यस्तु कृतयत्नो दृश्यते। तथाहि तेनोक्तं द्व्यणुकादिर्नैव सिध्यति प्रमाणाभावात्। त्रसरेणवस्तु प्रत्यक्षा भवन्ति। त्रसरेणवो हि महत्त्वे सति रूपवत्त्वात् क्रियावत्त्वाच्च सावयवा भवन्ति कार्याश्च। न च त्रसरेण्ववयवा अपि सावयवा भवन्ति, तादृशकल्पने प्रमाणाभावात्। यद्यपि ते महत्त्वव्यावृत्तेः अणुपरिमाणा निरवयत्वाच्च अप्रचयाः तथापि बहुत्वात् महत्परिमाणविशिष्टकार्यद्रव्याणि आरभन्ते। तस्मात् त्रसरेण्ववयवा एव परमाणवः, न द्व्यणुकसद्भावः सिध्यति। अत्रोच्यते महतो हि कार्यनियमाद् द्व्यणुकसिद्धिः। अन्यथा परमाणुभिः एव बहुत्वसंख्योत्पत्त्यङ्गीकारे महद्द्रव्यारम्भे गोघटादेरपि तैः एव आरम्भस्य सम्भवाद् आन्तरालिकाल्पाल्पतरादिकार्योपलम्भविरोधः। एवं बहुभिर्विचारैर्हि उदयनाचार्येणेह द्व्यणुकसिद्धिर्विहिता[१३८]।

न्यायकन्दल्याम् अपां विचारवेलायां स्नेहविषये एवम् आलोचितम्, ननु अयं स्नेहः पृथिव्यादौ अपि वर्त्तते, क्षीरे यथा तैले सर्पिषि च। न हि सर्वत्र दृश्यते, न खलु पाषाणेष्टकाशुष्केन्धनादिषु अदर्शनात्। क्षीरादिषु यद् दृश्यते तत्संयुक्तसमवायाद् उदकगतस्यैव, यथा हि सांसिद्धिकद्रव्यत्वस्य क्षीरतैलयोः स्वाश्रसन्निकर्षात्। उदकधर्मत्वं स्नेहस्य सर्वत्र अन्वयव्यतिरेकविधानाद्धि।

[१३८] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-२५८

उपकूलवर्तिप्रभवानां तृणपादपादीनां दृश्यते स्निग्धता, जाङ्गलप्रदेशजानाञ्च दृश्यते रुक्षता। यत्र च सततं परिषेचनं विधीयते तेषां तु स्निग्धत्वम्, तद्व्यतिरिक्तानाञ्च शुष्कत्वम् एव[१३९]। किरणावलीकारेण आलोचितम् अत्र नैमित्तिकद्रवत्वम् इव नैमित्तिकः स्नेहः पृथिव्यां भविष्यति पार्थिवे घृतादौ अनुपलब्धेः इति चेन्न, अन्वयव्यतिरेकाननुविधानात्। पार्थिवं द्रवत्वं यथा जतुघृतादिषु द्रव्येषु पावकसंसर्गाद् उपलभ्यते तद्विरोधिसलिलावसेकात्तु निवर्त्तते तथा स्नेहः। तस्मात् पार्थिवद्रव्ये निमित्तरूपाः जलीयावयवाः तेषां संयुक्तसमवायेन स्नेहस्तत्रोपलभ्यते[१४०]।

[१३९] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-१०९
[१४०] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-२७६

# उपसंहारः

श्रीधराचार्यस्य कालः प्रायेण एकनवत्युत्तरनवशततम(९९१)-खृष्टवर्षम्। उदयनाचार्यस्य कालः प्रायेण पञ्चाशदुत्तरद्विसहस्रतम(१०५०)-खृष्टवर्षम्। उभयोः कालव्यवधानं कियदिति सुतरां दृश्यते। प्रायेण प्राचीनत्वाद् एव श्रीधराचार्योक्तयः किरणावलीकारोक्त्यपेक्षया सरला विस्तृताश्च, तत्र किरणावल्युक्तिषु तु दृश्यते स्वल्पत्वं युक्तेर्दार्ढ्यञ्च। बहुत्रैव मया श्रीधराचार्योक्तमतात् किरणावलीकारमतस्य युक्ततरत्वम्, क्वचिच्च श्रीधराचार्यस्य मतस्यैव समीचीनत्वम्, क्वचिद्वा उभयोर्मतसाम्यम् अपि लक्षितम्। एतत्पर्यालोचनस्य फलं तु पदार्थधर्मसङ्ग्रहस्य यथार्थबोधः, तस्य सम्यग्बोधे च सति भवति सूत्राणाम् अपि सम्यक्प्रतीतिः। केवलैकतरमत-पर्यालोचनेन अस्माकं मतेर्नैशत्यं तु न जायते, दृश्यते च बहुत्रैव कस्यचिद् एकस्य व्याख्यानबाहुल्यम् अपरस्य च तद्विषये मितं मतम्। तेन हि एकमात्रमतालोचने ज्ञानं न पूर्णत्वं याति, बहुतरनयविचारेणैव राद्धान्तः स्थापनीयः। यथोक्तं न्यायसूत्रम् – विमृश्य पक्षप्रतिपक्षाभ्याम् अर्थावधारणं निर्णयः इति। मयापीह केवलम् उभयोर्मतयोरुल्लेखम् अकृत्वा विरोधस्थले स्वमत्यनुगुणविमर्शनेन दर्शनतत्त्वाधिगमननिमित्तकः प्रयासो विहितः। व्याख्यानं खलु दुर्मतेर्मतिमालिन्यापहारि, व्याख्यानद्वैविध्ये च

मतेर्द्वैविध्यमेवापततीति किं तावत् सार्थक्यं व्याख्यानस्य? अत एवात्र मया पर्यालोचनेन विचारः अपि क्वचिद् विहितः।

उदयनाचार्यस्य नव्यन्यायशैल्यारम्भः अत्र टीकायाम् अपि बहुत्रैव दृग्गोचरं भवति, किन्तु तन्मस्य अवलम्बनं श्रीधराचार्यमतम् इति बहुत्रैव समीक्षितम्। वस्तुतस्तु किञ्चिन्नूतननयाविष्करणं यथा अतिदुष्करं तथा तन्नयस्य परिष्करणम् अपि। श्रीधराचार्येण यन्मतम् उद्भावितम् उदयनाचार्येण तन्मतस्य ग्रहणं क्वचिच्च खण्डनेन परिष्करणम् अपि कृतम्।

यथा सर्वसंयोगिसमानदेशत्वस्य अर्थः सर्वेषां संयोगिनां मूर्त्तद्रव्याणाम् आकाशः समानो देश एक आधार इति उभाभ्याम् एव टीकाकृद्भ्यां समान एव निरूपितः, विशेषस्तु अयम् उदयनाचार्येण आकाशादयः केन सम्बन्धेन आधार इति प्रतिपादितं संयोगसम्बन्धेन इति। अत्र श्रीधराचार्येण प्रशस्तपादभाष्यस्य दोषशङ्कैका एवं खण्डिता – सर्वसंयोगिनाम् आधार आकाशादिकं यद्यपि न भवति आधाररूपेण अवस्थानात् तथापि उपचारेण सर्वसंयोगाधारत्वात् सर्वसंयोगिनाम् आधार इत्युक्तम्। अत एव सर्वगतम् इति भाष्यकारवचनस्य न पौनरुक्त्यम्, तत्र सर्वैः सह संयोगस्य उक्तत्वात्, इह च आधारवचनात्।

किरणावलीकारस्तु इह एवं व्याख्यायति – यत् पूर्वं सर्वमूर्त्तेषु आकाशादय एव वर्त्तन्ते इति कथनाद् अत्र च आकाशादिषु ते एव भावा

वर्तन्ते इति व्याख्यानात् न भवति पौनरुक्त्यम्[१४१]। श्रीधराचार्यमतम् अपि उदयनाचार्येण पक्षान्तरतया उल्लिखितम्, मूर्त्तसंयोगा एव पूर्वम् आकाशादौ तिष्ठन्ति इति उक्तम् इह च मूर्त्ता एव आकाशादिषु सन्ति न तु मूर्त्तसंयोगा इति कथनात् पौनरुक्त्याभावः[१४२]।

पृथिव्या नित्यानित्यत्वभेदप्रसङ्गे परमाणुलक्षणा नित्या[१४३] इत्यस्य व्याख्याने न्यायकन्दल्यां यत् परमाणुस्वभावायाः पृथिव्याः सत्त्वे किं तावत् प्रमाणम्? अत्रोच्यते अनुमानम्। एवंक्रमेण तत्र त्रसरेणुसिद्धिस्ततो द्व्यणुकसिद्धिश्च दृश्यते। एतत्समा एव प्रक्रिया किरणावल्याम् अपि दृश्यते, विशेषस्तु तत्र वैशद्यं सूक्ष्मत्वञ्च।

परमाणुरूप-पृथिव्याः सद्भावे न्यायकन्दलीकारेण एवम् उक्तं यत् तत्र अनुमानम् एव प्रमाणम्, अणुपरिमाणतारतम्यं तु नूनं क्वचिद् विश्रान्तिं लभते परिमाणतारतम्यत्वाद् महत्परिमाणतारतम्यवत्, यत्रेदं विश्रान्तं यतः परमाणुर्नास्ति सः परमाणुः इति[१४४]। उदयनाचार्येण अत्र प्रतिपादितं यत् नात्र किञ्चित् प्रमाणान्तरगवेषणया, त्रसरेणोः प्रत्यक्षसिद्धत्वात्। तस्य चावयवकल्पने प्रमाणाभावात् तस्य निरवयवत्वम्। एतदपि असन्मतम्, यदि तस्य अनेकद्रव्यवत्त्वं न स्यात् तदा महत्त्वम् अपि न स्यात्, तस्मात् स त्रसरेणुः

[१४१] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-७१

[१४२] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-१६८

[१४३] प्र.पा.भा., सम्पा. जयकृष्णदासः, पृ -१२

[१४४] न्या.क., सम्पा. ड. जे.एस.जेटलि वसन्त जि परिख, पृ.-९४

अनेकद्रव्यसमवेतः अस्मच्चक्षुर्ग्राह्यत्वात्, घटादिवत्। त्रसरेणोर्हि अनेकैरवयवैर्भाव्यम्, महत्त्वं प्रति हि अनेकद्रव्यस्य कारणत्वम्। तस्मात् त्रसरेणोः अवयवाः सावयवाः महद्द्रव्यारम्भकत्वात्, तन्तुवत्। ते अपि सावयवाः इत्यतो विभज्यन्ते, घटवत्। तेषाम् अपि अवयवकल्पनं तु न भवति, प्रमाणाभावाद् बाधकाभावाच्च[१४५]।

पार्थिवविषयव्याख्यानकाले न्यायकन्दलीकृता द्व्यणुकसिद्धिविषये तु न विहितो यत्नः, उदयनाचार्यस्तु कृतयत्नो दृश्यते। तथाहि तेनोक्तं द्व्यणुकादिर्नैव सिध्यति प्रमाणाभावात्। त्रसरेणवस्तु प्रत्यक्षा भवन्ति। त्रसरेणवो हि महत्त्वे सति रूपवत्त्वात् क्रियावत्त्वाच्च सावयवा भवन्ति कार्याश्च। न च त्रसरेण्ववयवा अपि सावयवा भवन्ति, तादृशकल्पने प्रमाणाभावात्। यद्यपि ते महत्त्वव्यावृत्तेः अणुपरिमाणा निरवयत्वाच्च अप्रचयाः तथापि बहुत्वात् महत्परिमाणविशिष्टकार्यद्रव्याणि आरभन्ते। तस्मात् त्रसरेण्ववयवा एव परमाणवः, न द्व्यणुकसद्भावः सिध्यति। अत्रोच्यते महतो हि कार्यनियमाद् द्व्यणुकसिद्धिः। अन्यथा परमाणुभिः एव बहुत्वसंख्योत्पत्त्यङ्गीकारे महद्द्रव्यारम्भे गोघटादेरपि तैः एव आरम्भस्य

---

[१४५] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-२२७

सम्भवाद् आन्तरालिकाल्पाल्पतरादिकार्योपलम्भविरोधः। एवं बहुभिर्विचारैर्हि उदयनाचार्येणेह द्व्यणुकसिद्धिर्विहिता[१४६]।

न तु एतेन श्रीधराचार्यमतस्य हेयत्वमापतति, तन्मतम् अनवलम्ब्य प्रकृततत्त्वस्य दुर्ग्रहत्वादिति उभयोरेव आचार्ययोः नयमणयो विचार्यत्वेन ग्राह्या इति दिक्।

[१४६] कि.व., सम्पा. शिवचन्द्र-सार्वभौम, पृ.-२५८

# ग्रन्थसूचिः


अन्नम्भट्ट। *तर्कसङ्ग्रहः*। सम्पा. नारायणचन्द्र गोस्वामी, कलकाता: संस्कृत पुस्तक भाण्डार, १४१० (वङ्गाब्द, तृतीय संस्करण)।

अन्नम्भट्ट। *तर्कसङ्ग्रहः*। सम्पा. सत्कारिशर्मा वङ्गीय, वाराणसी: चौखम्बा संस्कृत संस्थान, २००३ (चतुर्थ संस्करण)।

उदयनाचार्य। *किरणावली*। सम्पा. गौरीनाथ शास्त्री, कलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९९० (प्रथम संस्करण), प्रथम खण्ड।

उदयनाचार्य। *किरणावली*। सम्पा. गौरीनाथ शास्त्री, कलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९९० (प्रथम संस्करण), द्वितीय खण्ड।

उदयनाचार्य। *किरणावली*। सम्पा. गौरीनाथ शास्त्री, कलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९९१ (प्रथम संस्करण), तृतीय खण्ड।

उदयनाचार्य। *किरणावली*। सम्पा. शिवचन्द्र सार्वभौम, कलिकाता: एशियाटिक् सोसाइटि, १९११ (प्रथम संस्करण)।

उदयनाचार्य। *न्यायकुसुमाञ्जलिः*। सम्पा. श्रीमोहन भट्टाचार्य, कलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९९५ (प्रथम संस्करण)।

केशवमिश्र। *तर्कभाषा*। सम्पा. गङ्गाधर कर, कलकाता: महाबोधि बुक एजेन्सि, २००८ (प्रथम संस्करण), प्रथम खण्ड।

केशवमिश्र। *तर्कभाषा*। सम्पा. गङ्गाधर कर, कलकाता: महाबोधि बुक एजेन्सि, २०१४ (द्वितीय संस्करण), २००९ (प्रथम संस्करण), द्वितीय खण्ड।

कौण्डभट्ट। *वैयाकरणभूषणसारः*। सम्पा. चन्द्रिकाप्रसाद द्विवेदी, दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, २०१६ (पुनर्मुद्रण)।

गोस्वामी, सीतानाथ। *ब्रह्मसूत्रेर अध्यासभाष्य।* कलकाता: संस्कृत पुस्तक डिपो, २०१२ (प्रथम प्रकाश)।

दास, देवकुमार। *संस्कृत साहित्येर इतिहास।* कलिकाता: सदेश, १४२१(वङ्गाब्द, त्रयोदश संस्करण), १४०४ (वङ्गाब्द, प्रथम प्रकाश)।

न्यायपञ्चानन, विश्वनाथ। *भाषापरिच्छेदः*। सम्पा. पञ्चानन भट्टाचार्य, कलकाता: महाबोधि बुक एजेन्सि, १४२३ (वङ्गाब्द, पुनर्मुद्रण), १३७७ (वङ्गाब्द, प्रथम प्रकाश)।

*प्रशस्तपादभाष्यम्।* सम्पा. जयकृष्णदास गुप्त, काशी: विद्याविलास यन्त्रालय, १९२३ (प्रथम प्रकाश)।

*प्रशस्तपादभाष्यम्।* सम्पा. ब्रह्मचारी मेधाचैतन्य, कलकाता: संस्कृत बुक डिपो, २०१७ (प्रथम प्रकाश), प्रथम भाग।

*प्रशस्तपादभाष्यम्।* सम्पा. ब्रह्मचारी मेधाचैतन्य, कलकाता: संस्कृत बुक डिपो, २०१७ (द्वितीय मुद्रण), २००० (प्रथम प्रकाश) द्वितीय भाग।

भट्टाचार्य, दीनेशचन्द्र। *वङ्गे नव्यन्यायचर्चा।* कलाकाता: वङ्गीय साहित्य परिषद्, १३५८ (वङ्गाब्द, द्वितीय मुद्रण), १४१४ (वङ्गाब्द, प्रथम प्रकाश)।

महर्षि कणाद। *वैशेषिकदर्शनम्।* सम्पा. अमित भट्टाचार्य, कलकाता: संस्कृत बुक डिपो, २०१२(प्रथम प्रकाश)।

महर्षि गोतम। *न्यायदर्शनम्।* सम्पा. तारानाथ न्यायतर्कतीर्थ, अमरेन्द्रमोहन तर्कतीर्थ, न्यु दिल्ली: मुन्शिराम मनोहरलाल पाब्लिशार्स प्राइभेट लिमिटेड, १९८५(द्वितीय संस्करण), १९३६ (प्रथम प्रकाश)।

महर्षि गौतम। *न्यायदर्शनम्*। सम्पा. फणिभूषण तर्कवागीश, कलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षद्, २०१४ (पञ्चम प्रकाश), १९८१ (प्रथमप्रकाश), प्रथम खण्ड।

रघुनाथ-शिरोमणि। *पदार्थतत्त्वनिरूपणम्।* सम्पा. मधुसूदन भट्टाचार्य, कलकाता: संस्कृत कलेज, १९७६।

वन्द्योपाध्याय, धीरेन्द्रनाथ। *संस्कृतवाङ्मयस्य इतिहासः*। कलकाता: संस्कृत पुस्तक भाण्डार, २०१४ (प्रथम प्रकाश)

शङ्करमिश्र। *वैशेषिकसूत्रोपस्कारः।* सम्पा. सेख साविर आलि, कलकाता: संस्कृत बुक डिपो, २०१३ (प्रथम प्रकाश)।

शिवादित्यमिश्र। *सप्तपदार्थी* (मितभाषिणी – पदार्थचन्द्रिका – सन्दर्भ-जिनवर्द्धनी-सहिता)। सम्पा. तपनशङ्कर भट्टाचार्य, कलकाता: संस्कृत बुक डिपो, २०१२ (प्रथम प्रकाश)।

श्रीधराचार्य। *न्यायकन्दली*। सम्पा. डक्टर जे.एस.जेटलि, वसन्त जि परिख, वडोदरा: ओरियेन्टल इन्स्टिटिउट्, १९९१ (प्रथम संस्करण)।

श्रीप्रभाचन्द्र सूरि। *प्रमेयकमल-मार्तण्डः।* सम्पा. महेन्द्रकुमार शास्त्रि, दिल्ली: श्रीसद्गुरु पाब्लिकेशन्स, १९९० (तृतीय संस्करण), १९१२ (प्रथम संस्करण)

श्रीयोगेन्द्रनाथ तर्कसांख्यवेदान्ततीर्थ। *भारतीय दर्शनशास्त्रेर समन्वय*, कलकाता: कलिकाता विश्वविद्यालय, १९५८ (प्रथम प्रकाश)।

Dasgupta, Surendranath. *A History of Indian Philosophy,* Delhi: Motilal Banarasidas, 1975.